इतिहासपुराणाभ्या वेद समुपबृहयेत् ॥

× × ×

अधियज्ञविषय स्कन्दादिभाष्यम् । निरुक्तत्वधिदैवतविषयम् । इद तु भाष्यमध्यात्मविषयमिति । न च भिन्नविषयाणा विरोध । अस्य भाष्यस्य मूलं विष्णुधर्मोत्तरम् । × × × अत्र वृद्धशौनक—

अङ्गिरा ब्रह्मजस्तस्मादुचथ्या ममतापति ।
तस्मादधीत(त्य) वेदादीननुज्ञातो बृहस्पति ॥

There are some ślokas here recording the legend of Dirghatamas, the Rishi of this Sūkta, and stating further that the author is born in his family

ततो दीर्घतमा वृद्धगौतमो गौतमस्तत ।
गोतमेषु तदारभ्य सूक्तार्थ· स्फुरति स्फुटम् ॥

तत्कुले विश्रुतो विष्णु स्ततो विष्णुप्रकाशक ।
आत्मानन्दस्तदुत्पन्नस्तेनेद भाष्यमीरितम् ॥
× × × ×

मुषित गच्छन् पिता प्रादात्परं वेदार्थबोधनम् ।
तदनेन प्रसंगेन भाष्यमेतन्मयेरितम् ॥

तदेव भाष्यकृत्यर्थे पुण्यौघनिचयेनरः(य) ।
प्रजातान् सुकृती स्वामी सहजानन्दकेशवः ॥

नमो विष्णुप्रकाशाय केशवाय गरीयसे ।
पुंसे च पुष्कराक्षाय श्रोचथ्यायोशिजाय च ॥

Colophon—इति श्रीवामनसूक्तं (स)भाष्यं समाप्तम् ॥

3

0851 E. (जैमिनीयब्राह्मणम्) अहीनम् ।

(Jaiminiyabrâhmaṇam) Ahinam.

It is the 5th division of the Jaiminiyabrâhmaṇa of the Sâmaveda. The Brâhmaṇa of the Jaiminiya śâkhâ consists of 8 divisions, divided into Khaṇḍas to wit, (1) Mahâbrâhmaṇa 360 Khaṇḍas, (2) Dvâdaśâham, 388 Khaṇḍas, (3) Mahâvratam, 152 Khaṇḍas, (4) Ekâham, 153 Khaṇḍas, (5) Ahinam, 99 Khaṇḍas, (6) Satram, 37 Khaṇḍas, (7) Ârsheyam, 84 Khaṇḍas, and (8) Upanishad, 154 Khaṇḍas, A similar kind of division was adopted by the adherents of the Kauthumaśâkhâ of the Sâmaveda in dividing their Brâhmaṇa.

In this Sâkhâ the following works only are available (1) Jaiminiya Samhitâ-described here under No 23 Only an index to the Mantras of this Samhitâ is published being edited by Dr. W Caland in 1907 (2) Jaiminiya Brâhmana Among the eight, the first six divisions of this work are described in this Volume Extracts from this Brâhmana have been published by the same editer in 1919 The other two, viz, the Upanishadbrâhmana and the Ârsheyabrâhmana have been published being edited by Dr. Oertel, in 1894 and Burnell in 1878 respectively (3) The Srauta (Agnistoma prakarana only) and Grihya sûtras for this Śâkhâ are also published being edited by Dr Dieuko Gastara in 1906 and by Dr. W Caland in 1905

This Sâkhâ is also known as the Talavakâra Sâkhâ, and the well-known Kenopanishad or the Talavakâropanishad is a part of the 8th division of this Brahmana

Beginning—अथैते द्विरात्रा इयिष्मारश्च धे इविष्कृच्चाङ्गिरसावास्ता। सावस्मिल्लोके ब्रोचर्यं प्रमत्तो चरन्तावृषयाऽङ्गिरस पितरश्च पितामहाश्च सुक्वतो हित्वा स्वर्गं लोकमायस्तौ यदा सा चर्या पर्येयीदथाकामयेता कथन यत्र नावृषयोङ्गिरस पितरश्च पितामहाश्च सुक्यस स्वर्गं लोकमि-तास्तदनुगच्छेवेति तौ तपोऽतप्येतान्तावेतद्द्विरात्र यज्ञमपश्यता । तमाह रेतान्तेनायजेता। तता वै तौ यत्रेनयो ऋषयोऽङ्गिरस. पितरश्च पितामहाश्च सुक्यत स्वर्गं लोकम्मिता आसंस्तमन्वगच्छता । स य. कामयेत यत्र मे पितरश्च पितामहाश्च सुफ्नतस्स्वर्गं लोकमितास्तदनुगच्छेयमिति स पतेन यजेत ।

End—अथ यस्यैतस्य ज्योतिर्गौरायुरतिरात्रो ज्योतिर्गौरायुरति-रात्रो ज्योतिरतिरात्रो य कामयेत ज्योतिष्मतो लोकाञ्जयेयमिति स पतेन यजेत । चत्वार्युह धै देवानामाधिष्टमानावति ज्योतींष्यभिः पृथिव्या-

मादित्यो दिवि चन्द्रमा नक्षत्रेषु पितृदृष्ट्वेतानेव व्यातिष्मतो लोकाश्र-यति य एवं विद्वानेतेन यज्ञक्रतुना यजते य उचैनमेवं वेद य उचैन-मेवं वेद ॥ ९९ ॥

Colophon—इत्यहीनम् ।

4

12695. ऋगर्थसारः । Rigarthasâraḥ.

By Dinakarabhaṭṭa.

This work is a short commentary on the selected Riks from the eight Ashtakas and the prose portions extracted from the Brâhmaṇa of the Rigveda. Gâgâbhatta, who is mentioned in the last colophon as the younger brother of Dinakarabhaṭṭa, is apparently different from the author of the Bhâṭṭachintâmaṇi who is said to be the son of Dinakarabhaṭṭa. (Vide Chowkhamba edition) For Bhâṭṭadinakariya, (an elobarate commentary on the Pûrvamimâṁsâsûtra) another work of this author, *See* OL. Tri. III. I. B. 2418

Beginning—श्रीगणेशाय नमः । वेदपुरुषाय नमः ।

संसारचक्रे मुनयोऽप्यनाथा यां मातरं मातुदरे निवासम् ।
नेच्छन्त्युमां तां प्रतिनम्य पात्रं न स्यामहं कस्य मनोरथस्य ॥

श्रीरामकृष्णं पितरं नत्वोमां चापि मातरम् ।
ऋग्वेदसारभूतानामृचां भाष्यानुरोधतः ॥

अर्थं ब्रूते दिनकरः क्वचिद्भाष्यविरोधतः ॥
लोकरञ्जनसिद्ध्यर्थमनेन प्रीयतां गुरुः ॥

. ओम् । अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ १ ॥

अस्या. मधुच्छन्दा ऋषि । अस्यार्थ. । अहं अग्निं ईळे स्तौमि । कीदृशो...पुरोहितम् । पुरोधीयते-तम् । अथवा देवानां पुरोहितम्...... पुन.की०। यज्ञस्य देव प्रकाशकं देवो दानाद्वा दीपनाद्वेति यास्कः। पुनःकी०। ऋत्विजम् । ऋतौ वसन्तादिकाले यजति तादृशम् । होतारम् । आह्वातारम् । होमनिष्पादक वा । पुन की० । रत्न० मं० । रमणीयानां धनाना दातृतमम् ॥ १ ॥ × × ×

एतानि वामश्विना वीर्याणि प्रपूर्व्याण्यायवोऽवोचन् ।
ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरा सो विदथ मा वदेम ॥८६॥

अर्थ —हे अश्विनौ । वा-युवयो· सम्बन्धीनि पूर्व्याणि ।

× × ×

Colophon—इति श्रीमन्नारायणभट्टसूरिसूनु रामकृष्णात्मज दिनकरभट्टकृते ऋगर्थव्याख्यासारे प्रथमाष्टकान्तर्गतव्याख्या समाप्ता ॥

ततो द्वितीयान्तर्गतर्च ।
नाकस्य पृष्ठेऽधितिष्ठति श्रितो य पृणाति सह देवेषु गच्छति ।

Only a very few Riks are selected here and are commented on from the 3rd to 7th Ashtakas, each having separate colophons

Colophon—इति श्रीमन्नारायणभट्टात्मज रामकृष्णभट्टसुत दिनकरभट्टकृते मन्त्रविभागान्तर्गतऋगर्थसारेऽष्टमाष्टकान्तर्गतव्याख्या समाप्ता ॥ मन्त्रविभागवेदे ऋगर्थसार समाप्त ।

Post-colophon—इदं पुस्तक स्वावलोकनार्थं भाटे उपनाम्ना अनन्तनारायणेन लिखितमार्ये. परिशोधनीयम् ।

शके १७३२ संवत् १८६७ प्रमधनामाब्दे दक्षिणायने मार्गशीर्षसिता-ष्टम्यां लेखनम् ।

Beginning of the Brâhmaṇa—

अथ ब्राह्मणविभागगद्यार्थसारः । हरिश्चन्द्रपद्कस्य विषमव्याख्या ।

× × ×

End—इति नाभानेदिष्ठोपाख्यानम् । तदप्येतदृषिणोक्तं स इद्राजा प्रभिजन्यान्यारभ्य पुरोहितमेवैतदभिपदतीत्यन्त खण्डम् । तदर्थः । यत-त्पुरोहितमाहात्म्यं त्रिभिर्मन्त्रैरुक्तम् ।

× × × ×

मे द्विषन्तं भ्रेष्टारं तिदेहन्तु भस्मीभवन्तु नाशं प्राप्नुवन्त्वित्यर्थः ।

Colophon—इत्युमारामकृष्णसुत नागाभट्टात्मज दिनकरभट्टकृते ब्राह्मणार्थसारे अष्टमपञ्चिकान्तर्गतब्राह्मणखण्डस्य विषमव्याख्या ॥

इति ब्रह्मार्थसारः समाप्तः ॥

5

6429. ऋग्वेदसंहिताभाष्यटीकाविवृतिः—भावरत्नप्रकाशिका ।

Rigvedasaṁhitâbhâshyatîkâvivritiḥ—Bhâvaratnaprakâśikâ.

By Nârâyaṇa.

It is a fragmentary portion of the commentary on Jayatîrtha's Tîkâ of the Rigvedasaṁhitâbhâshya by Ânandatîrtha.

Ânandatîrtha commented on the first three Adhyâyas only and the commentary is in a versified form. The present MS comprises a portion of the commentary on the 3rd Adhyâya only.

Beginning—.. ...ननु विद्याकर्मणोरिति तु प्रकृतत्वादिति सूत्रे—

' विद्यापथः कर्मपथो द्वौ पन्थानौ प्रकीर्त्तितौ ।
तद्वर्जितस्त्रिधा याति तिर्यग्वा नरकं तमः । '

इति भाष्योदाहृतभारतवचने विद्यासामर्थ्य(ध्य)तया ज्ञानिभिः प्राप्यस्य मार्गस्यैकत्वोक्तेः ; तथा-" अर्चिरादिना तत्प्रथिते " रिति सूत्रे,

' द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम् ।
धूमादिः कर्मणां चैव सर्ववेदविनिर्णयात् । '

इत्यादिभाष्योदाहृतवचनेषु च ज्ञानिभिः प्राप्यमार्गस्यैकत्वकथनादत्र पन्थान इति कथं बहुवचनमित्यत आह-पथामिति । अर्चिरादिसूत्रेष्वेव अग्निर्ज्योतिरिति ग्रंथेर्याचिष(षः)सम्प्रतिष्ठितइत्याद्युदाहृतभाष्यवचनेषु अर्चिरा..........तरभेदेन बहुत्वोक्तेस्तदभिप्रायेण बहुवचनमुपपन्नमिति भावः ॥ वर्ग ७ ॥

अथाप्नुवन्नित्यत्र भाष्ये आप्नुवन्निति क्रियापदात्पूर्वं अथ इत्युपसर्गमध्याहृत्य योजनामाह-अवाप्नुवन्निति । ज्ञानवितितिमिति । शिष्येषु ज्ञानविस्तारमिच्छन्नित्यर्थ. । अध्यापनेन शिष्येषु परम्परया ज्ञानविस्तृतिसम्भवादिति भाव. । यद्वा अध्यापनेन स्वस्य ज्ञानवितर्ति भगवद्गुणादौ स्वयोग्यतानुसारेणाधिकज्ञानमिच्छन्नित्यर्थः ।

End—उत्तमपुरुषैकवचने धातोरडागमे सति अकार्षमिति रूपनिष्पत्तेस्तस्य न(आ)ङाऽन्वये सवर्णदीर्घे सति नाकार्षमिति रूपमिति ज्ञेयम् । ...दमिति ..इति ज्ञेयम् । बुधैरिति विज्ञजनैरित्यर्थ । सम्मतामिति । विनयप्रदर्शनमेतदिति ज्ञेयम् । स प्रेरकः सदा सर्वदेवतानां श्री...यिने ।

ऋग्भाष्यटीकाव्याख्यानां सम्यक्तात्पर्यवर्णने ।
गुरुपादा......स्तत्कृपाबलतो मया ॥
लेशेन वर्णितो भावो बालानां बोधसिद्धये ।
.. .. प्रीतिपूर्वकम् ॥

Colophon—इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्सर्वतन्त्रस्वतन्त्र........श्रीनारायणाख्येन कृतायां श्रीमद्भाष्यटीकाभावरत्नप्रकाशिकायां तृतीयाध्यायटीकाविवृतिः समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥

6

9851 D. (जैमिनीयब्राह्मणम्) एकाहम् ।

(Jaiminiyabrâhmanam) Ekâham.

The 4th division of the Jaiminiyabrâhmana of the Sâmaveda. *See* No 3 above.

Beginning—अथैष उपशद । कश्यपो वा अकामयतोपोषमा प्रजा. पशव श्रीयेरन्नुपोष प्रजया पशुभि प्रजायेयेति । स एत यज्ञमपश्यत. माहरत्तेनायजत । ततो वै तमुपोष प्रजा पशवोऽश्रीयन्तोपोष प्रजया पशुभि. प्राजायतोपोषहवा एन प्रजा पशवश्श्रीयन्त उपोष प्रजया पशुभि. प्रजायते य एव वेद तस्य त्रिवृद्बहिष्पवमान भवति ।

End—यश्चातुर्मास्ययाजी वसन्तमेव प्रथमेनाह्नाप्येति ग्रीष्म द्वितीयेन वर्षास्तृतीयेन शरदश्चतुर्थेन हेमन्त पञ्चमेन शिशिर षष्ठेन संवत्सरमेव शुनासीर्येणाप्येति स सर्वस्तोमो भवति सर्वं हि तयत्सर्वस्तो-मस्सर्वमेवैतेनाप्येति तस्य त्र्येणी शलली भवति । लोहायस क्षुरस्सचतुर्थं, चतुर्षु मास्सु केशान्परिवर्तयतेऽनन्ततायाः असौवा आदित्योनन्तोऽनन्तो वा असौ भूत्वेद सर्वमभ्यश्नुते । अनन्तो भूत्वेद सर्वमभ्यश्नुवा इत्यनन्तो भूत्वेद सर्वमभ्यश्नुवा इति ॥ १५३ ॥

Colophon—इत्येकाहम् ॥

7

9807 A. छान्दोग्यब्राह्मणभाष्यम् ।

Chhândogyabrâhmaṇabhâshyam.

By Guṇavishṇu.

This work is a commentary on the Mantras of the first two parts of the Chhândogyabrâhmaṇa or Mantrabrâhmaṇa of the Kauthuma Śâkhâ of the Sâmaveda. The remaining eight parts of the Brâhmaṇa constitute what is known as the Chhândogyopanishad. These Mantras, commented on in the present work, are used in the Grihya ceremonies of the Sâmavedins. This same work, described under No. 70 in the OL. 1, 2, is attributed to Sâyaṇâchârya and it slightly differs from this MS only in the beginning. *See* I. O. 280., L. 491, 1024 and 1049 and HPS. II, 1266-1268.

Beginning—शङ्कराय नमस्तस्मै भक्तानां यत्प्रसादतः ।
सूक्ष्मान्तर्हितदूरस्था देवा भान्ति तथा यतः ॥

प्रणिपत्य गुरूनाद्यान्पाठकान् बोधकांस्तथा ।
यत्प्रसादेन जानन्ति प्रवक्तुं मादृशा अपि ॥

सदाशूयस्य वैषम्यनिरूपायत्वहेतुभिः ।
छन्दोगमन्त्रभाष्यं मे गुणविष्णुर्विधास्यति ॥

अहं यद्यपि शब्दार्थप्रभावार्थोचितविक्लवः ।
तथाप्याशूयसौन्दर्याज्ञनोमुष्मिन् प्रवर्त्स्यैति ॥

अदितेऽनुमन्यस्वेत्यादियजुस्त्रयं पर्युक्षणे विनियुक्तम् ।

End—अनपराधां वा अदितिं अदीनां हे यजमानपरिचारकाः इयं मा वधिष्ट। प्राणैर्मा वियोजयत। अहमेवं जनाय यजमानाय चिकित्सुषे कृतप्राने विदुषे ज्ञानसंपन्नाय प्रब्रवीचम्। नु वितर्के प्रवोचं प्रकर्षेणोक्तवान् गोधेर्ममा कुरुतेति॥

Colophon—गुणविष्णुकृतछन्दोगमन्त्रभाष्यं समाप्तम्।

8

9851 B. (जैमिनीयब्राह्मणम्) द्वादशाहम्।

(Jaiminiyabrâhmaṇam) Dvâdaśâham.

The 2nd division of the Jaiminiyabrâhmaṇa of the Sâmaveda. *See* No. 3. above.

Beginning—हरिः ओम्। द्वादशाहम्। ओम्। प्रजापतिर्वाव इदमग्र आसीत्। सोऽकामयत। बहु स्यां प्रजायेय भूमानं गच्छेयमिति। स तपोऽतप्यत। स आत्मन्नृतिवयमपश्यत्ततस्त्रीनृतून्सृजतेमानेव लोकान्यदृतिवयादसृजत तदृतूनामृतुत्वम्। यदृतिवयादजनयत्तस्मादृत्विज इत्याख्यायन्ते। स यत्प्रथममतप्यत। ततो ग्रीष्ममसृजत। तस्मात्स बलिष्ठन्तपति।

End—फाल्गुनो वै मासो द्वादशाहस्य प्रथममहः। चैत्रो द्वितीयम्। वैशाखस्तृतीयम्। आषाढपौ(पू)र्णमासश्चतुर्थम्। श्रोणाश्रविष्ठः पञ्चमम्। शातभिषजष्षष्ठम्। प्रोष्ठपदस्सप्तमम्। आश्वयुजोऽष्टमम्। कार्त्तिको नवमस्मार्गशीर्षो दशमम्। तैष एकादशम्। माघो द्वादशम्। प्रायणीय एवातिरात्रस्त्रयोदशो मासः। उदयनीयस्संवत्सरश्चतुर्दशस्स एष द्वादशाहस्सर्वेषु लोकेषु प्रतिष्ठितः। स य एवमेतं द्वादशाहं सर्वेषु लोकेषु प्रतिष्ठितं वेद (स, सर्वेषु लोकेषु प्रतितिष्ठति। स एष वाव द्वादशाहो य एष तपत्येष इन्द्र एष प्रजापतिः। एष एवेदं सर्वमित्युपासितव्यम्। एष एवेदं सर्वमित्युपासितव्यम्॥ ७॥

Colophon—इति द्वादशाहम्॥ ३३॥ ३८८॥

9

381 A. पुरुषसूक्तम् ।

Purushasûktam.

This belongs to the 19th Kânda of the Paippalâda-Sâkhâ of the Atharvaveda. It is stated in the post-colophon that this 19th Kânda belongs both to the Paippalâda Sâkhâ and the Jâjalaśâkhâ of the Atharvaveda. This Sûkta slightly differs from the Purushasûkta of the Riksamhitâ and contains sixteen Riks in all.

For the Paippalâda Śâkhâ of the Atharvavedasamhitâ *See* DC. I. I. 378, and Buhler's Report 1.

Beginning—श्रीगणेशायवागुरुभ्यो नमः । ओम् । सहस्रबाहुरिति षोडशनारायणः पुरुषो देवता अनुष्टुभः पुरु(ष)सूक्तजपे विनियोगः ।

ओं सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

त्रिभिः पद्भिर्द्यामारोहत्पादोऽस्येहाभवत्पुनः ।
तथा व्यक्रामद्विष्वङ्ङशनानशने अनु ॥ २ ॥

तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

End—मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः ।
राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ॥ १६ ॥

Colophon—इत्यथर्ववेदपैप्पलादशाखीयैकोनविंशतितमे काण्डे पुरुषसूक्तं समाप्तिमगमत् ॥

Post-Colophon—इदं काण्डं शाखात्रयगामि । पैप्पलादशाखायां नानकशाखायाश्च ॥

10

9125. मन्त्रभाष्यम् ।

Mantrabhâshyam.

It is a commentary on a selection of Mantras from the first Maṇḍala of the Rigvedasaṁhitâ. It differs slightly from the Sâyaṇa's commentary. As the MS is incomplete in the beginning and at the end, neither the purpose of the selection nor the author's name can be ascertained. The MS contains the commentary on 23 Mantras (3-25) only.

Beginning—......तिप्रत्ययेऽन्तोदात्तः स्वस्तिशब्दः ॥ २ ॥

(१-९-५) सञ्चोदयेति । हे इन्द्र चित्रं रत्नादि नानारूपं अथवा राधनीयं वरेण्यं व्रियते संभुज्यते तथोक्तं राधः धनं अर्वागस्मदभिमुखं यथा भवति तथा सञ्चोदय सम्यक्प्रेरयेत्यर्थः । कुतो देयमित्याशङ्कायामाह-ते तव विभु विशेषेण भवतीति वर्धमान प्रभु प्रभूतं अपरिमितं असदित्-स्यादेव । अस्त्येव वा । तस्मादस्मभ्यं प्रयच्छेत्यर्थः । उपसर्गादाद्युदात्तः ।

End—अतोदीर्घो यञि-निघातः ॥ २५ ॥

(१-११२-२४) अप्नस्वती अश्विना । हे अश्विनौ अस्माकं वाचं अप्नस्वतीं अप्न इति कर्मनाम । विहितैः अग्निष्टोमादिकर्मभिः संयुक्तां कृतं कुरुतम् । यद्वा अप्न इतिरूपनाम × × × ×

वस्तुतस्तु दिवु-क्रीडादौ-भावेक्तिन् । छ्वोः शूडित्यूठ् । देवनं द्यूतप्रकाशः नास्ति अक्षो वा द्यूतप्रकाशः यस्याः सा अद्यूतिः रात्रिः तत्रभवो अद्यू...

11

6005. मण्डलब्राह्मणभाष्यम् ।

Maṇḍalabrâhmaṇabhâshyam.

By *Nârâyaṇendrasarasvati.*

It is a Bhâshya on the Maṇḍalabrâhmaṇa, a part of the Śatapathabrâhmaṇa (X. 5-2.) of the Śuklayajurveda. This Brâhmaṇa treats of the worship of the Sun. As the Sûryamaṇḍala is praised in the beginning, it is called Maṇḍalabrâhmaṇa. The author is also known as Śâśvatendra and Râjahaṁsa. He is a disciple of Nârâyaṇendra. *See* DC I-I 354.

Beginning—श्रीगणेशाय नमः ।

विचार्य सर्ववेदान्तैः सञ्चार्य हृदयांबुजे ।
प्रचार्य सर्वलोकेषु आचार्यं शङ्करं भजे ॥

पद्मपादो विश्वरूपी हस्तामलकतोटकौ ।
अद्वैतदीक्षागुरवः साचार्याः पञ्च पान्तु माम् ॥

× × × ×

नारायणेन्द्रपादाब्जमिलिन्दीकृतमानसः ।
श्रीशाश्वतेन्द्रो जयति राजहंसापराभिधः ॥

× × × ×

नामार्थस्तु—मण्डलस्तावकं ब्राह्मणं मण्डलब्राह्मणमिति । शाकपार्थिवादिगणपाठादुत्तरपदलोपेन विगृह्यते ।

End—तस्मादेतद्वेदान्तश्रवणादिना निर्वाणं दुर्वारम् । इति सर्वं रमणीयम् ॥ २३ ॥

नारायणेन्द्रकर्मादिसरस्वत्याः पदाब्जयोः ।
रत्नपादुकयोश्छायां समाश्रित्य भयापहाम् ॥ १ ॥

मण्डलब्राह्मणस्यास्य सूर्यरूपनिषेविनः ।
व्याख्यानमेतद्रचितं निर्मत्सरत्वकरं परम् ॥ २ ॥

निर्मत्सराणां सूरीणां हृदयव्योममण्डले ।
राजहंससरस्वत्या तदङ्घ्रिप्रीतये सदा ॥ ३ ॥

समस्तशाखाकल्पोक्तसन्ध्यावन्दनकर्मसु ।
विनियुक्ता वेदमन्त्रा व्याख्याता येन सर्वशः ॥ ४ ॥

माध्यन्दिने तैत्तिरीये वेदे मैत्रायणीयके ।
षड्भिरङ्गैरुपेतस्य रुद्राध्यायस्य सक्रमम् ॥ ५ ॥

तत्तद्भाष्याणि संलोच्य भाष्यसंगतिपूर्वकम् ।
कर्मकाण्डक्रमं त्यक्त्वा सगृहीतञ्च येन च ॥ ६ ॥

अन्ये च वैदिकग्रन्थाः कृता येन च द्राविडे ।
आन्ध्रे देशे सुप्रसिद्धाः पदवाक्यप्रमाणतः ॥ ७ ॥

× × × ×

तस्येमां कृतिमालोक्य तुष्यन्तु भुवि सूरयः ।
सशिष्याः सप्रशिष्याश्च सोपशिष्या दयालवः ॥ १४ ॥

Colophon—इति श्रीपरमहंसपरिव्राजकाचार्य श्रीनारायणेन्द्रसरस्वत्याः कृतौ माध्यन्दिनशाखाशतपथमध्यगताखण्डमार्तण्डमण्डलब्राह्मणभाष्यं पण्डितमण्डनं नाम सम्पूर्णम् ॥

12

13034. मन्त्रभागवतव्याख्या-मन्त्ररहस्यप्रकाशिका ।

Mantrabhâgavatavyâkhyâ-Mantrarahasyaprakâśikâ.

By Nîlakaṇṭha.

A commentary on a selection of 250 Riks from the Rig-Veda where the meaning of the Mantras are perverted into references to the story of the Bhâgavata. The commentary is divided into four Kâṇdas and it breaks off in the beginning of the 4th Kâṇda. For other remarks and fuller description—*See* L. 1511 and HPS. 177 and 178.

Beginning—श्रीगणेशाय नमः ।

सत्यं ज्ञानमनन्तं यत्तद्विष्णोः परमं पदम् ।
प्राप्तुं मन्त्रेषु गोपालविष्णोः कर्माणि पश्यत ॥

Colophon—इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धर चतुर्धरवंशावतंस गोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ स्वाद्भुतमन्त्रभागवतव्याख्यायां मन्त्ररहस्यप्रकाशिकायां गोकुलकाण्डः प्रथमः ॥

Last Colophon—अक्रूरकाण्डस्तृतीयः ॥

13

9851 A. (जैमिनीयब्राह्मणम्) महाब्राह्मणम् ।

(Jaiminiyabrâhmaṇam) Mahâbrâhmaṇam.

The Mahâbrahmaṇa is the first division of the Jaiminiyabrâhmaṇa of the Sâmaveda *See* No. 3 above.

Beginning—श्रीगणेशाय नमः । अविघ्नमस्तु ।

सामाखिलं सकलवेदगुरोर्मुनीन्द्रा-
द्व्यासादवाप्य भुवि येन सहस्रशाखम् ।
व्यक्तं समस्तमपि सुन्दरगीतराग-
स्तज्जैमिनिं तलवकारगुरुं नमामि ॥

वेदोक्तं कर्म येनासीन्मीमांसित्वा सुनिश्चितम् ।
व्यासशिष्याय मुनये तस्मै जैमिनये नम ॥

ओम् । तदाहुः केन जुहोति कस्मिन्हूयत इति प्राणेनैव जुहोति प्राणे हूयते तपदेतदग्नीन्मन्यन्ति यजमानस्यैव प्राणाञ्जनयन्ति ।

End—तद्यस्यैवं विद्वान् ब्रह्मा भवति दक्षिणतो ह्यस्योदङ्यज्ञ-प्रणवो भवति । दक्षिणतो ह्यस्योदङ्यज्ञ प्रणय सन्तिष्ठते । यस्यैव विद्वान् ब्रह्मा भवति । य उचैनमेव वेद य उचैनमेवं वेद ॥ २३ ॥
खण्डम् ॥ ३६० ॥

Colophon—इति महाब्राह्मणम् ॥

Post-Colophon—यदक्षरपदभ्रष्टं ... क्षन्तुमर्हन्ति सन्त । दुन्दुभिनामसंवत्सरम् कार्तिकमासम् ॥ ६ ॥ महाब्राह्मणम् ॥ ३६० खण्डम् ॥ पञ्चनदि मीनाक्षिसुन्दरेश्वरन् स्वहस्तलिखितम् । जैमिन्याचार्याय नम. । अस्मद्गुरुभ्यो नम ॥

14

9851 C (जैमिनीयब्राह्मणम्) महाव्रतम् ।

(Jaiminîyabrâhmanam) Mahâvratam.

This is the 3rd division of the Jaiminîyabrâhmana of the Samaveda *See* No 3. above

Beginning—सावित्रं पूर्वेद्युः पशुमालभन्ते । सविता वै देवानां प्रसविता । सवितृप्रसूता एवैतत्संवत्सरमारभन्ते । के श्वेतमर्द्धस्य प्रसूत आरभन्त । प्राजापत्यं स्वोभूत आरभन्ते । प्रजापतिर्ज्येष्ठो वै देवाः । ज्येष्ठत एवैताः प्रीणन्ति । यो वै श्रेष्ठमाराधयित्वा अथान्यानीप्सन्ति सर्वे वा तस्य ते र(रा)धिता भवन्ति । × × ×
गावो वा एतदग्रे सत्रमासतानाधमवरुन्धमानाः । ता दशमे मास्युदतिष्ठन् सर्वमन्नाद्यमवारुत्स्महीति मन्यमानास्ता एताः शृङ्गिणीस्तासां त्वा इयावृधन् सर्वानेवैतान् द्वादशमासस्समापयामेति । ता अतिमायन्नत ।

End—अथ यां क्रीते राजनि सुब्रह्मण्यामाह्वयति । यामेतां दक्षिणासु नीयमानासूत्करे तिष्ठन् सुब्रह्मण्यामाह्वयति सैवेयमथो यत्प्रायणन्तदुदय-नमसदित्यथो आगत एवेन्द्रस्तन्मा निर्वोचाम इत्येवाह वै धेनुः पञ्चवत्सा पञ्चपदा । यद्वसा इदमाहुः पाङ्क्ताः पशव इत्येतद्वतत्तां ह गा एके यथादेवतमाह्वयन्ति । सर्वाग्नेयीमग्निष्टुत ऐन्द्रीमिन्द्रस्तोमस्य वैश्वदेवीं वैश्वदेवस्यानिरुक्तामनिरुक्तस्य तदु ह स्माश्वघ्नतया नोहिब्रह्मणो व्यापादोऽस्ति यथा निपतितमेवाह्वयेद्यथा निपतितमेवाह्वयेत् ॥ ८० ॥ हरिः ओम् ॥ १५२ ॥

15

5778. रुद्रभाष्यम् ।

Rudrabhâshyam.

By Râjahamsa Sarasvati.

It is a commentary on the Rudrâdhyâya of the Vâjasaneyi-samhitâ in accordence with the Mahîdharabhâshya on that Samhitâ. Râjahamsa Sarasvati, the author, comments besides on some more Mantras which are the Pûrvôttarângas of the

Rudrajapa. He also establishes that the Rudrâdhyâya-Japa with its Aṅgas, though useful in other rites, is a means to attain salvation. The author is also known as Nârâyanendra Sarasvatî and Śâśvatendra. *See* No. 11 above and DC. 1. 1. 531.

Beginning—श्रीगणेशाय नमः ।

विचार्य सर्ववेदान्तं संचार्य हृदयांबुजे ।
प्रचार्य सर्वलोकेषु आचार्यं शङ्करं भजे ॥

पद्मपादो विश्वरूपो हस्तामलकतोटकौ ।
अद्वैतदीक्षागुरवः साचार्याः पञ्च पान्तु माम् ॥

नारायणेन्द्रपादाब्जं विश्वेन्द्रवरणाम्बुजम् ।
नृसिंहेन्द्रपदांभोजं कैवल्येन्द्रपदाम्बुजम् ॥

× × × ×

अपवर्गाख्यस्य चरमपुरुषार्थस्य तु साधनानि शतरुद्रियजपतदर्थश्रवणमननिदिध्यासनानि । अस्मिन्नप्यर्थे पूर्वोक्तमेव प्रमाणम् विस्तरभयान्नोदाहरामः । अस्यार्थस्य निखिलभुवनप्रसिद्धेश्च । यस्मादेवं तस्मात्तानिचाङ्गानि तत्राङ्गिनमर्थविवरणपूर्वकं निरूपयिष्यामः । सहस्तोमा, यज्ञामतः, पुरुषसूक्तं, उत्तरनारायणं, अप्रतिरथसूक्त, विभ्राडित्यादीनामङ्गत्वेन न्यासादिविनियोगे किं प्रमाणं किंवा प्रयोजनमिति चेदाकर्णय ।

× × × × यद्यप्येते पूर्वोक्ताः सर्वेऽप्यनुवाकास्तत्तदध्यायेषु तत्तत्कर्मसु विनियुक्तास्तथापि पूर्वोक्तरीत्या षडङ्गन्याससहितश्रीरुद्राध्यायाध्ययने विनियोगो विज्ञायताम् । तस्मात्तत्तत्कर्मप्रकरणसंगतिं परित्यज्य षडङ्गन्यासानुरोधेन मन्त्रार्थो लिख्यते । आदौ सहस्तोमा इति कण्डिकार्थो लिख्यते ।

सहस्तोमाः सहच्छन्दस आवृतः सहप्रमा ऋषयः ।

End—यतो यत —हे महादेव पार्वतीपते करुणाकरविग्रह यतोयतो यस्माद्यस्माद्दुश्चरितात्वं समीहसे । अस्मास्वपकर्तुं चेष्टसे ततस्ततो नोऽस्माकमभयं भीत्यभावं कुरु । सर्वदा सर्वथा सर्वपापेभ्यो मां रक्षेत्यर्थः ।

महीधरस्य भाष्य सम्महीरसुरभाष्यवत् ।
विलोक्य रुद्रसङ्गत्या लिलेख यतिनायकः ॥ १ ॥

राजहंससरस्वत्या भाष्य वाजसनेयकम् ।
महीधरकृतं वीक्ष्य(क्ष्या) लेख्याभासादि पूर्वकम् ॥ २ ॥

Post-Colophon—श्रीमद्गुणाङ्करसभूयुतशालिवाहे (१६९३)
मार्गे खरे शरदि शुक्लतिथौ नवम्याम् ।
दैवज्ञवर्यमनोहरजो गणेश-
नामातिगूढमलिखत्स च रुद्रभाष्यम् ॥

शके १६९३ खरनामाब्दे मार्गशीर्षे मासि शुक्लपक्षे नवम्यां तिथौ
विद्वन्मनोहरात्मज गणेशेन लिखितमिदं रुद्रभाष्य समाप्तम् ॥

16

6481 B. रुद्रभाष्यम् ।

Rudrabhâshyam

By Venkatanâtha.

An elaborate commentary on the Rudradhyâya and is similar to the work mentioned above From the colophon it seems that this Venkatanâtha and the author of the Brahmâ nandagiri—a commentary on the Bhagavadgita (Vânivilâs edition)—are the same But the present work is attributed to Abhinava-Sankarâcharya, the Guru of Venkatanâtha in the Vânivilâsa edition

Beginning—श्रीदक्षिणामूर्तिगुरुपरब्रह्मणे नमः ।

Beginning—ओम् । नमः शिवाय । अथ..............रुद्रव्याख्या । रुद्रमुपगायति । हे रुद्र ते-तव मन्यवे क्रोधाय नमः । उत समुच्चये । अपिच ते-तव इषवे नमः उत अपिच ते तव बाहुभ्यां नमः अस्त्विति । सङ्घत्र............भिन्नाद्यक्रियासाधर्म्यमप्युत जातिन्यायात् ॥ १ ॥

गिरिशंत इति । गिरौ पर्वतेस्थितः शत्रून्......भिन्दन्तु

End—तेषां ५ सहस्रयोजनेऽव धन्वानि तन्मसि । ....रुद्रास्तु-यन्ते । तेभ्यो रुद्रेभ्यो नमोऽस्तु । तेभ्यः केभ्यः ये द्युलोके स्थिताः तेषां रुद्राणां । वर्ष वृष्टिः । औषधमाप्नुवन्तीति ॥

18

587. वाजसनेयिसंहिता । (माध्यन्दिनीयशाखा)

Vâjasaneyisamhitâ (Mâdhyandiniyaśâkhâ)

Herein, each Adhyâya begins with its last Mantra and ends with the first. The intervening Mantras also are arranged in the same topsyturvy fashion. Again, the Padas of every Mantra are so arranged that the final Pada becomes the first and the first becomes the last. This Vilomakrama-Pâṭha, was, parhaps, intended to help the reciter to keep the whole Samhita in memory.

Beginning—असि देवयजनमनाधृष्टन्देवानाम्प्रियं नाम धामामृतं शुक्रमसि तेजस्त्वा सवितुर्यजुषे यजुषे अथ मे धाम्ने धाम्ने देवेभ्यः सुदृरसि जिह्वाग्रेः पश्याम्यत्र चक्षुषा त्वादब्धेनत्वोर्जेऽसि येभ्योसिज्जोरास्नास्यदित्यै माजिम सं वाजेऽध्याये त्वा वाजिनीं सपत्नक्षि दस्यनिशिता माजिम सं वाजेऽध्यायै त्वा वाजिनं सपत्नक्षि दस्यनिशितः ॥ १ ॥

× × × ×

इह किल श्रुतिस्मृतीतिहासपुराणप्रसिद्धमेव श्रीरुद्रोपनिषदस्त्वर्थे दोसमत्यम् । तथाहि जाबाल्युपनिषदि तावत् " अथ हैनं ब्रह्मचारिण ऊचुः । किं जप्येनामृतत्वं ब्रूही" ति मोक्षसाधन जप्यप्रश्ने " स होवाच याज्ञवल्क्यः शतरुद्रियेण " इति । एतानि वा अमृतस्य नामधेयान्येतै- र्है वा अमृतो भवतीति शतरुद्रियशब्दवाच्यश्रीरुद्रोपनिषदः प्राधान्येन मोक्षसाधनत्वं प्रतिपाद्यते । शतं रुद्रा देवता अस्येति शतरुद्रियम् ।

End—शेषं पूर्ववदिति सर्वं रमणीयम् । अथ नमो रुद्रेभ्य इत्यादि समाप्त्यन्तं यजुस्त्रयमेको मन्त्रः । अस्यऋषिः श्रीरुद्रो देवता । ध्यानम्—सहस्राणि सहस्रश इत्यत्रोक्तमेव ग्राह्यम् ।

अन्नसमृद्धिप्रदोयं मन्त्रः । पुरश्चरणप्रकारः ।.........त्पादकज्जा- तिस्मरत्वादिफलप्रभेदाश्च रुद्रकल्पार्णवादिषु प्रपञ्चिताः द्रष्टव्याः ॥

Colophon—इति श्रीपरमहंसपरिव्राजकसार्वभौम श्रीमदद्वैतविद्या- प्रतिष्ठापकाभिनवशङ्कराचार्य सर्वतन्त्रस्वतन्त्र श्रीमद्रामब्रह्मानन्दभगवत्पूज्य- पादानां शिष्येण श्रीवेङ्कटनाथेन विरचिते यजुर्वेदभाष्ये श्रीमद्रुद्रोपनिष- द्भाष्यं संपूर्णम् ॥

Post-Colophon -श्रीसांबशिवार्पणमस्तु । रुधिरोद्गारिनाम संव- त्सरं श्रावण........ ...गुरुमूर्तिशास्त्रि राशिनरुद्रभाष्यंसमाप्तम् ॥

17

10650. रुद्रव्याख्या ।

Rudravyâkhya.

It is an anonymous commentary on the Rudrâdhyâya. Leaves 2–4 and the last are missing.

Beginning—ओम् । नमः शिवाय । अथ...... .. . .. रुद्रव्याख्या ।
रुद्रमुपगायति । हे रुद्र ते-तव मन्यवे क्रोधाय नम । उत समुच्चये ।
अपिच ते-तव इषवे नमः उत अपिच ते तव बाहुभ्यां नमः अस्तिवति ।
सद्यत्र.. .... भिर्वाद्यक्रियासाधर्म्यमप्युत जातिन्यायात् ॥ १ ॥

गिरिशंत इति । गिरौ पर्वतेस्थितः शन्नुन्... ..भिशन्तु

End—तेषा ्सहस्रयोजनेऽव धन्वानि तन्मसि । .... रुद्रान्
यन्ते । तेभ्यो रुद्रेभ्यो नमोऽस्तु । तेभ्य केभ्य. ये द्युलोके स्थिताः तेषा
रुद्राणां । वर्षं वृष्टिः । औषधमाप्नुवन्तीति ॥

18

587 वाजसनेयिसंहिता । (माध्यन्दिनीयशाखा)

Vâjasaneyisamhitâ (Mâdhyandiniyaśâkhâ)

Herein, each Adhyâya begins with its last Mantra and ends with the first The intervening Mantras also are arranged in the same topsyturvy fashion Again, the Padas of every Mantra are so arranged that the final Pada becomes the first and the first becomes the last. This Vilomakrama-Patha, was, parhaps, intended to help the reciter to keep the whole Samhitâ in memory.

Beginning—असि देवयजनमनाधृष्टन्देवानाम्प्रिय नाम धामामृत
शुक्रमसि तेजस्त्वा सवितुर्यजुषे यजुषे भव मे धाम्ने धाम्ने देवेभ्य
सुदुरसि जिह्वाग्रे पश्याम्यत्र चक्षुषा त्वाद्य्धेनत्वौर्जैऽसि येभ्योविष्णोरा-
स्नास्यविन्दै मार्जिम स वाजेऽध्यायै त्वा वाजिनीं सपत्नक्षि दस्यनिशिता
मार्जिम स वाजेऽध्यायै त्वा वाजिन सपत्नक्षि दस्यनिशित ॥ १ ॥

× × × ×

पाहि पशून् यजमानस्य बह्वीः स्यात गोपतावस्मिन्ध्रुवाः अयशंसो मेशतस्तेन घो मायक्ष्मा अनमीवा प्रजावतीर्भागमिन्द्रायाऽध्न्याऽऽप्याय-ध्वमाकर्मणे श्रेष्ठतमायार्पयतु प्रसविता वो देवस्य वायवस्त्वोर्जेत्वेषे ॥१॥

Colophon—इति प्रथमोऽध्यायः

End—घर्म ः स्विदस्कस्य गृधो मा भुञ्जीथास्त्यक्तेन तेन । जगत्ज-गत्यां च किं यत्सर्वमिदं वास्यमीशा ॥

Colophon—इति चत्वारिंशत्तमोऽध्यायः ॥

Post-colophon—श्रीकृष्णार्पणमस्तु । मिति मार्गशीर्षवद्य सौम्य घासरे तद्दिने पुस्तकं समाप्तम् । संवत् १९४७ विकृति नाम वत्सरे दक्षिणायने समाप्तम् ।

19

9456. वाजसनेयिसंहिताटिप्पणी(?)

Vājasaneyisamhitāṭippaṇī(?)

It is a short commentary on the Vājasaneyisamhitā of the Mādhyandina Śākhā, and it enumarates only the application of the Mantras and explains the meanings of a few words. As the MS is incomplete an the end, the name of the work is not known.

Beginning—ओं नमो यजुर्वेदाय । शाखां छिनत्ति ॥ इषे । वृष्ट्यै । छिनद्मि ॥ संनमयति ॥ ऊर्जे । रसाय । अन्नाय वा । संनमयामि ॥ शाखया वत्सं स्पृशति ॥ वायवः ॥ गां स्पृशति ॥ देवोवः । अघ्न्या गावः । अरोगाः । मा ईशतां । पापशंसीः ॥ शाखोपगूहनम् ॥ यजमानस्य ॥ १ ॥

Colophon—इत्येकोनचत्वारिंशत्तमोऽध्यायः ।

End—अथ ज्ञानकाण्डम् । ईशावास्यम । ईश्वरेणाच्छादनीयं । माभिकाङ्क्षय । कस्य पुनरेतद्धनम । न कस्यापि ॥ १ ॥ कुर्वन् । इह लोके । जीवितुमिच्छेः । नयमुक्तिरस्ति ॥ २ ॥

असुर्या अज्ञानलक्षणेन तमसा । आत्मैव तान् लोकान् । अज्ञानिनो-
जनाः ॥ ३ ॥ अनेजत् । अचलत् । शीघ्रतरम् । पूर्वमविनश्यदास्ते ।
अभ्यानतिक्रम्य गच्छति । कर्माणि वायुस्स्थापयति । तत्क्रियाफलं ददाति ।
आत्मत्वेनान्त. । जडत्वेन बाह्यतः । ५ । यआत्मन्येवं छिन्नसंशयो
भवति । ६ । यस्मिन् ॥

20

10600. वाजसनेयिसंहिताभाष्यम् ' ऋजुभाष्यम् ' ।

Vâjasaneyisamhitâbhâshyam. ' Rijubhashyam '.

It is a short commentary on the Vâjasaneyi Samhitâ of the Mâdhyandiniya Sâkhâ The MS contains Adhyâyas 29-31 and 38-40 only. This commentary differs, completely from the printed Bhâshya of Mahidhara, and slightly from that of Uvata. The *Catalogus Catalogorum* mentions two other commentaries by Ânantadeva and Anandabhatta the extracts from which are not available.

Beginning—श्रीगणेशाय नम. । समिद्धोऽअन्न । एकादशी त्रि-
ष्टुप् ।...... .....कण्वो वामदेव्योऽश्वो वा सामुद्रिरपश्यत् । अश्वस्तुतिः ।
आश्वमेधि......... .कृष्णग्रीव इति यावत् । हे भगवन्नग्ने समिद्धः सदीप्तः
समस्तं जगत् ।...... .. ..विशिष्टस्त्वं रुद्र मतीनाम् ।

× × ×

अस्माकं नराः अश्वपर्णाः अश्वारूढा अस्मदीया मनुष्याः संग्रामे
सञ्चरन्तु । हे इंद्र त्वत्प्रसादात् अस्माक रथिनो जयन्तु ॥ ५७ ॥

आग्नेयः कृष्णग्रीव इति श्रुतिः । आऽध्यायपरिसमाप्ते. अग्नेरेकाद-
शिन्योः पशुदेवतासम्बन्धविधायिनी ॥ ५८ ॥

Colophon—इति मन्त्रभाष्ये ऊनत्रिंशोऽध्यायः ॥

The MS breaks off in the beginning of 39th Adhyâya and begins again from the 40th Adhyâya with separate pagination. This latter part is identical with the Uvaṭa-bhâshya.

ओम् नमः श्रीवेदपुरुषाय । ज्ञानकाण्डमिदानीं प्रस्तूयते । ईशावास्यम् ।.....................स्यशिष्यं पुत्रं वा गर्भाधानादिभिः संस्कारैः संस्कृतशरीरमधीतवेदमुत्पादितपुत्र यथाशक्त्यनुष्ठितयज्ञमपापम् ।

End—सत्यसङ्कल्प इत्यादि । एतद्वै तदक्षरं गार्गि यस्मिन्नाकाश-ओतश्च प्रोतश्चेति सामान्यादाकाशेनैव एतद्रूपं ब्रह्माभिहितं स्यात् । अयमेव च ब्रह्मविधौ सिद्धान्तः ॥

Colophon—इति ऋजुव्याख्याने संहितायां चत्वारिंशत्तमोऽध्यायः॥

Post-Colophon—संवत् १५६४ फाल्गुन शुद्ध १४ भौमे लिखितम् ।

21

8208. विट्ठलऋङ्मन्त्रसारभाष्यम् ।

Vitthalariṅmantrasârabhâshyam.

By Kâśinâthopâdhyâya.

Here twelve Mantras from the Riksaṁhitâ are commented on with reference to the worship of Vitthala, an incarnation of Vishṇu An exhaustive explanation also is given to establish Vitthala's worship as Vaidikâchâra. In support of this argument the author refers to the many works

and several authors, the latest among whom belongs to the 18th century For other details *See* HPS. II. 176.

Beginning—श्रीगणेशाय नमः । श्रीपाण्डुरङ्गाय नमः ।

श्रीमद्विठ्ठलसमपदकमल कमलङ्करोति नो वाचा ।
यद्धि परोक्षप्रियविभुनिश्वसितैर्गणितश्च निश्वसितैः ॥

अथ श्रीमद्विठ्ठलदेवताप्रतिपादका मन्त्रा व्याख्यायन्ते । सर्वे वेदा-यत्पदममामनन्तीति श्रुते. सगुणे ब्रह्मणि सतच्छब्दप्रवृत्तिहेतूना सम्भवात्सर्वे शब्दा परस्मिन् प्रवर्तन्त इति श्रीविठ्ठलसहस्रनामभाष्याच सर्वस्य वेदस्य भगवत्प्रतिपादकतया सकलसूक्ताना तत्परत्व स्पष्टमेव । तथापि विशेषत श्रीविठ्ठलपरत्वस्य शूद्रादिब्रह्मजनाना बोधार्थं यथामति कतिचिदेव मन्त्रा. प्रदर्श्यन्ते ।

तत्र ऋक्संहितायां प्रथमाष्टके सप्तमाध्याये प्रथम सूक्तम् । त्रेधि-रूपे चरत. स्वर्षे etc etc

End—एवमन्यान्यपि प्रक्रियाकौमुदीटीकाकृता कालनिर्णयदीपिकाटीकाकृताञ्च वचनानि परश्शतानि द्रष्टव्यानि । विस्तरभिया नेहोदाह्रियन्ते ।

तथा कुवलयानन्दटीकाया मङ्गलपद्यम् ।

कन्दर्पीयति यः पुरो मृगदृशा × × × श्रीविठ्ठलं नौमि तम् ॥ इत्यस्मिन्पद्येऽपेक्षा लुप्तोपमा.सन्ति । किञ्च गोदावरीतीरे प्रतिष्ठानक्षेत्रे वास्तव्या एकनाथाभिधाना साधुराजराजिमुकुटालङ्कारास्ते श्रीविठ्ठलोपासका इत्यसन्दिग्धम् । तत्कृतभाषाकाव्यस्य परस्सहस्रस्य श्रीविठ्ठलपरस्योपलभ्यमानत्वात् । ते च कौस्तुभकर्त्रनन्तदेवपितामहस्य पितमहा । तथाच कौस्तुभादौ श्लोका' ।

आसीद्गोदावरीतीरे वेदवेदिसमन्वित. ।
श्रीकृष्णे भक्तिमानेक एकनाथाभिधोद्विजः ॥

तत्सुतस्तद्गुणैर्युक्तः सर्वशास्त्रार्थतत्त्ववित् ।
आपदेवोऽभवद्देवात्प्राप यः सफलान्मनून् ॥

मीमांसानयकोविदो मधुरिपोः सेवासु नित्योदितो
विद्यादानविभावितोत्तमयशा आसीत्तदीयात्मजः ।
यस्यानन्तगुणैरनन्त इति सन्नामार्थवत्तां गतं
येनावादि च वादिनां श्रुतिशिरःसिद्धान्ततत्त्वं मुदे ॥

न्यायप्रकाशकर्ता निरवधि विद्यामृतप्रदः सततम् ।
मीमांसाद्वयनयवित्तनयस्तस्यापदेवोऽभूत् ।

तदात्मजं वैदिकशास्त्रविज्ञं सन्तोऽसकृत्प्राहुरनन्तसंज्ञम् । इत्यादि ।

× × ×

Colophon—इति श्रीमदनन्तोपाध्यायसूरिसूनु काशिनाथोपाध्यायविरचितं श्रीमद्विट्ठलऋङ्मन्त्रसारभाष्यं समाप्तिमगमत् ॥

22

9851 F. (जैमिनीयब्राह्मणम्) सत्रम् ।

(Jaiminiyabrāhmaṇam) Satram.

The 6th division of the Jaiminiyabrāhmaṇa of the Sâmaveda. For other details *see* No. 3 above.

Beginning—ओम् । सत्रम् । अथैष त्रयोदशरात्रोऽसौ वा आदित्यस्सपूर्वैरन्यैर्देवै रासीदनेनाग्निना वायुना चन्द्रमसाऽन्यैर्देवैः । सोऽकामयत सर्वेषां देवानां श्रैष्ठ्यं गच्छेयं त्रयोदशो मासो भूत्वेदं सर्वमभ्यारोहेयमिति स एतं त्रयोदशरात्रमपश्यत्ततो वै स सर्वेषां देवानां श्रैष्ठ्यमगच्छत्त्रयोदशो मासो भूत्वेदं सर्वमभ्यारोहत् ।

End—य एव विद्वांस एता रात्रीरुपयन्ति सर्वमेव पाप्मानमुपह त्योत्तिष्ठन्ति इश्वरा हत्वपशवो भवितो पशवो मा उत्थातिं पशन्‌ हि स तन्नाप्यपौद्दचे ये श्रीकामास्स्युस्त एता रात्रीरुपयुरेताइ हस वे तत्पुरा कुरुपाञ्चालाना ब्राह्मणा श्रीकामा उपयन्ति ते हागावो भद्रा आसु स्सजातेषु हैवैषा पशय आसुस्ततोऽस्मैव गोरिहाय गताय गामुपार्जेन्ति। ततो देया यदूचुस्तदुहोवाच शाट्यायनिर्न ता यदेषा परिचक्षा यदा कामो नावै श्रिया पशवो यदा कामित वित्त पशुमन्तश्च भविष्याम श्रेष्ठाश्च रास्याम श्चेत्येव मन्यमाना एतारात्रीरुपेयुरिति तथा हैव भवति। वैश्वानर उदयनीयोऽतिरात्रो भवति वैश्वानरोदयनाह्यहीना सोमा ॥३७॥

Colophon—इति सत्रम् ॥

Post-Colophon—करकृतपराध क्षन्तुमर्हन्ति स-त-। शुभमस्तु । महाब्राह्मणम् । ३६० । द्वादशाहम । ३८८ । महाव्रतम् । १५१ । एका-हम् । १५३ । अहीनम् । १०० । सत्रम् । ३७ । आहत्य खण्डम् ११९० ॥ आर्षेयम् । ८४ । उपनिषत् । १५४ । आहत्य खण्डम् । १४२८ । रक्ताक्षि-नाम संवत्सरम् । दक्षिणायन कार्तिके मास १२ । बुधन्‌ फिलमै-(वारम) उत्तराषाढा नक्षत्रम् । वासिष्ठगोत्रं जैमिनिसूत्र सामशाखाध्यापकरान पञ्चनदिशास्त्रियल्‌ पुत्रन्‌ मीनाक्षिसुन्दरेश्वरन्‌ महाब्राह्मणमारभ्य स्वहस्तलिखितम् ॥

23

9856 B सामवेदसंहिता (जैमिनीयशाखीया)

Sâmavedasamhita (Jaiminiya Sâkhâ)

This Samhitâ of the Jaiminiya Sâkhâ consists of two parts, entitled Prakriti and Uttarâ both of which are again subdivided into Khandas The Prakriti consists of 66 Khandas

and the Uttarâ of 96 Khaṇḍas. The first part is again split up into four main divisions, namely, Âgneya, Aindra, Pavamâna and Âraṇa. The number of the Prakriti Riks is considered as 755.

The second part also is divided into eleven Adhyâyas.

An index of this Saṁhitâ is published by Dr. W. Caland, *See* No. 3 above.

Beginning—आग्नेयं पर्वं । तत्र गायत्र्यश्चतुर्विंशत् । अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि । १ । त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने । २ । अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् । ३ ।

End of the first part. इति शक्वर्यः । अथ पुरीषपदानि । एवाह्येवा एवाह्यग्ने । एवाहीन्द्र । एवाहि पूषन् । एवाहि देवाः ॥ ६४ ॥

Colophon—इति प्रकृतिऋचः ।

Post-Colophon—आग्नेयम् । ११६ । ऐन्द्रम । ४५८ । पवमानम् । ११७ । आरणम । ६४ ॥ आहत्य प्रकृतिऋचः ७५५ ॥ आहत्य प्रकृतिऋक् षट्षष्टि खण्डः ।

Beginning of the second part. ओम । अहर्गणक्रमेण ऋक्पाठः । अक्षरादौ खण्डद्वयस्य न साम ।

नमः पितृभ्यः पूर्वसद्भ्यो नमः साकंनिषद्भ्यः ॥

युञ्जे वाचं शतपदीम् ॥

End—माता अज्ञाता वृजना दुराध्योमा शिवासो अवक्रमः । त्वया वयं प्रवतः शश्वतीरपः ।

अतिधूर्तनामसि । ३० । हरि ओम् ॥

Colophon—इत्युत्तरमृच ॥ ९६ ॥

Post-Colophon—आहत्य षण्णवति खण्डा ।

आहत्य प्रकृत्यूहखण्डा द्विपद्युत्तरशतम् ॥
श्रीरङ्गनाथाऽध्वरिणस्तनूजश्श्रीरामभक्तस्स तु श्रीनिवास ।
ऋचा समग्र प्रकृतेर्लिलेख चोहस्य रामस्य शुभप्रसादात् ॥

24

9856 A सामवेदगानम् (जैमिनीयशाखीयम्)

Sâmavedagânam (Jaiminiyaśâkhâ)

The Gâna of the Sâmaveda of the Jaiminiya-Sâkhâ consists of 3681 Sâmans and is divided into four parts—Samhitâ, Âranyaka, Ûha and Rahasya Among these four divisions, the Samhitâ is again sub divided into three smaller parts—Âgneya, Aindra, and Pavamâna, and the Âranyka into Parvans—Vrata, Sukriya, Śakvara and Aupanishada The Sâmans also are arranged in the following order—

Samhitâgâna	1232	Sâmans
Âranyaka ,,	291	,,
Ûha ,,	1802	,,
Rahasya ,,	356	,,
	3681	

Beginning—सामाखिलं सकलवेदगुरोर्मुनीन्द्रा-
व्यासादवाप्य भुवि येन सहस्रशाखम् ।
व्यक्तं समस्तमपि सुन्दरगीतरागं
तं जैमिनिन्तलवकारगुरुं नमामि ॥

वेदोक्तं कर्म येनाऽऽसीन्मीमांसितया सुनिश्चित-
व्यासशिष्याय मुनये तस्मै जैमिनये नमः ॥

श्रीगुरुभ्य नमः । ओम् । गौतमस्य पर्कः ।

ओ ग्ना इ । आ या ही या इ ता या इ ता या इ
र त ध च च्य श टि श

End of the Samhitâ—

वर्मी हा सु, वा धृ ष्ण वा आ उ या र इ आ । म ॥ ३५ । ११ ॥
त्य त श क्य त्य -हा ख श

Colophon—इति पवमानम् पर्व ।

आग्नेयम् । १८२ साम । ऐन्द्रम् । ६४१ । साम । पवमानम् ४०९ साम ॥ आहत्य संहिता १२३२ साम ॥

अथारण्यम् । वाचो व्रते व्रे । हुवे वाचाम् । वाचम् ॥
क्य

End of the Âranyaka—

तत्सवितुर्वरेण्योम् । ओवा ओवा हिम् भा ओ वा
नु श म च च श क च

इति पञ्चविंशः खण्डः ।

Colophon—इत्यौपनिषदम् ॥

Post-Colophon—
वासिष्ठवंशांशुधिशीतदीधितेः
श्रीरंगनाथाध्वरिणस्तनूजवः ।
साम्नां समग्रं प्रकृतेर्लिलेख
श्रीरामभक्तः स तु श्रीनिवासः
इत्यारण्यम् समाप्तम् ॥

व्रतपर्व । २०९ साम । शुक्रियपर्व । १६० साम । शक्वरपर्व ३ साम । औपनिषदं पर्व १९ साम । आहत्य आरण्यम् वाचोव्रतादि गायत्रान्तम् २९१ साम । संहिता १२३२ साम । आहत्य प्रकृतिः—१५२३ ।

विजयाब्दे विशाखायां मासे कार्तिकसंज्ञके ।
त्रयोदश्यां मन्दवारे चलक्षेतरपक्षके ॥

अखिलं प्रकृतेः साम लिखितं कृपया गुरोः ।
श्रीनिवासेन भक्तेन श्रीरामस्य दयानिधेः ॥

Beginning of the Ūha—

प्रथमप्रद: । आमहीयवम् । उचाता इ जातमन्धसा ॥
खि ह.

End—आस्य मियोनिः औ मित्रा शूरनो नुमो वा ॥ २५ ॥ ४ ॥
क्त न्य षा

हरिः ओम् ॥

Colophon—इत्यूपाणि समाप्तम् ॥

Post-Colophon—

सऊहसामानीति नाम्नि छन्दोगऋषयो व्यधुः ।
इमालोपौ च षण्णत्वे तदूपाणीति सिध्यति ॥

वासिष्ठवंशोद्भवभूसुरोत्तमश्रीरङ्गनाथाध्वरिणस्तनूजः ।
ऊहस्य साम्नामखिलं लिलेख श्रीरामपादाश्रयश्रीनिवासः ॥

अब्देऽस्मिन् विजये मासि फाल्गुने शुक्लपक्षके ॥
त्रयोदश्यां भृगोर्वारे शुभयोगे च पैतृभे ॥

अखिलान्यूहसामानि पूर्णानि लिखितानि ह ।
श्रीनिवासेन भक्तेन रामचन्द्रदयानिधेः ॥

प्रथमम् ७५ साम । द्वितीयम् ८६ साम । तृतीयम् ९७ ॥ ऊषाणि-
त्रयम् । गायत्र्यादि रथन्तरान्तं रहस्यम् । ३५६ साम । ऊहम् १८०२ ।
ऊहरहस्यम् । २१५८ ॥ संहिता आरणम् १५२३ । आहत्य संहिता आर-
णम् ऊहरहस्यम् ३६८१ साम ॥

वेदार्थतत्त्वामलदर्पणं यश्चकार लोके ततकीर्ति शास्त्रम् ।
ज्ञानैकधाम्ने विदधाति तस्मै कृताञ्जलिर्जैमिनये नमस्याम् ॥

ब्राह्मणाभरणं ब्रह्म सामरूपं सहस्रधा ।
भिन्नं भूतमथो वन्दे जैमिनिं मुनिपुङ्गवम् ॥

धीविलासेन यस्यैव स्थापिता वैदिकी स्थितिः ।
सामगृह्याय मुनये तस्मै जैमिनये नमः ॥

II. VEDALAKSHANA.

25

7594. अथर्ववेदसूक्तविनियोगमाला।

Atharvavedasûktaviniyogamâlâ.

This work deals with the different kinds of applications for the Sûktas of the Atharvaveda Samhitâ in the काम्य rites according to the Kauśika Sûtra. From the post-colophon it appears that the work is a part of the 3rd chapter of some Lakshaṇagrantha of the Atharvaveda.

Beginning—श्रीगणेशाय नमः। शौनकीयानां मन्त्राणां यथाकामविनियोगविधिं व्याख्यास्यामः। तत्र ये त्रिषप्ता इति सूक्तेन यवाज्यिद्वौ संपाद्याभिमन्त्र्य बध्नाति मेधाकाम. ।१। ये त्रिषप्ता इति सूक्तेन उदुंबरसमिध आदधाति बध्नाति संपत्कामः ॥२॥ ये त्रिषप्ता इति सूक्तेन उदुंबरसमिध आदधाति ग्रामकामः।३। × × ×
अस्य सूक्तस्य दश विनियोगाः।

विश्वाशरस्येति सूक्तेनाज्यं जुहोत्याज्यतन्त्रेण संग्रामे जयकामः।१। विश्वाशरस्येति सूक्तेन पूर्वाब्दिदितृ (दूर्वादितु) णमूलानि संपात्याभिमन्त्र्य बध्नाति इषुनिवारणकामः।२।

End—विपासहिमिति काण्डेन पुरुषशरीरमभिमन्त्र्य (न्त्रयति) आयुःकामः।१। सुमतिकामश्च ॥२॥

Colophon—(१) विनियोगमालायां सप्तदशं काण्डं समाप्तम् ॥ विससाप मिति काण्डेन अन्त्येष्टिपितृमेधपिण्डपितृयज्ञेन विनियोगाः।

(२) विनियोगमालायां अष्टादशकाण्डस्य विनियोगाः समाप्ताः॥

ब्रह्मकाण्डस्य महाशान्त्यादिशान्ति कल्पे विनियोगः॥

(३) विनियोगमालायामेकानविंशतितमं काण्डं समाप्तम् ॥

याग्यकाण्डस्य ज्योतिष्टोमादिषु यज्ञेषु सहस्रसंवत्सरपर्यन्ता विनियोगाः ॥

(४) विनियोगमालायां विंशतितमं काण्डं समाप्तम् ॥

Post-Colophon—संवत् १९३० कार्तिकमासे शुक्लपक्षे दशमीतिथौ ल, पं, जं, रा श्रीवाराणस्यां (वाराणस्यां) मध्ये श्रीअथर्ववेदसंहितायां सूक्तस्य सर्वेषां काण्डानां प्रयोगमालायां विनियोगादि पृथक् भेदाः । ओं ये त्रिषप्तादारभ्य पचाग्र्यं तदश्विना इति पर्यन्तं विंशतिकाण्डानि शौनकीयशाखायां विनियोगमालाकल्पः समाप्तः ॥

इति श्रीअथर्ववेदे लक्षणग्रन्थे तृतीयसंहिताविनियोगमालायां संहितामन्त्रकल्पः संपूर्णः तृतीयः ॥

28

7869. ऋग्वेदसर्वानुक्रमणीव्याख्या ।

Rigvedasarvânukramanîvyakhyâ.

By Vâsudeva.

It is a commentary on Kâtyâyana's Sarvânukramaṇikâ, which is an index to the Rishis, the Devatas and the metres etc of the Rigvedasanihitâ.

Beginning—गणपतये नमः । स्तोतॄणामतिशयेन स्तोता यस्माद्यास्माकीना स्तोतार प्रस्तुवन्ति प्रयन्ते । यस्मादग्ने तव स्तोतारः प्रजायन्ते यश्च तथा स्तोतार. सन्तः प्रजायतेमहि । प्रयदग्ने यस्मादग्ने भानवः सर्वतः प्रयन्ति बलवतः ॥ त्वं हि स्म हि सर्वतोमुखः सर्वतः परिभवसि द्विषो नः शत्रूनस्मान् ।

Colophon—इति वासुदेवीये प्रथम मण्डलं समाप्तम्।

य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत्स गृत्समदो-द्वितीयं मण्डलमपश्यत्। अङ्गिरसो नप्ता भरद्वाजस्य पुत्रः शुनहोत्रः तस्य शौनहोत्रो भूत्वा पूर्वमात्मनो यज्ञवाटमागतमिन्द्रं गृहीतुमागतैर-सुरैरिन्द्रयुद्धया गृहीतः

End—सं स चतुष्कं संवननः संज्ञानमाग्नेयी तृतीया त्रिष्टुप् तृतीया त्रिष्टुप्। नमः शौनकाय नमः शौनकाय। संसमित्चतस्र. आङ्गिरसः संवनन ऋषि. समानो मन्त्र इति त्रिष्टुप् शिष्टा अनुष्टुभ. संज्ञानं देवता संस-इत्यस्या अग्निः। द्विरुक्तिर्ग्रन्थसमाप्त्यर्था। तत्कृतग्रन्थमूलत्वादस्य वर-रुचिः शौनकं नमस्करोति नमः शौनकायेति॥

अत्युक्तान्यन्ययोक्तानि यान्यनुक्तानि वा मया।
ऋषिछन्दोदेवतानि तानि शोध्यानि सूरिभिः॥

Last Colophon—समाप्तं वासुदेवीयम्॥ वररुचये नमः॥

27

10808. ऋषिछन्दोदेवता।

Rishichhandodevatâ.

By Sivarâma.

This is an index to the Rishis, the metres and the Devatas of each Rik in the three chapters of the Sâmaveda, namely, the Samhitâ, the Âraṇyaka, and the Uttarâ.

Beginning—श्रीगणेशाय नम। श्री सामवेदाय नमः।

प्रणम्य तात विश्रामं विघ्नेशं जगदम्बिकाम्।
संहितायाः ऋषिछन्दोदेवतानि यथामति॥ १॥
प्रयोगस्य च सिद्ध्यर्थं प्रवक्ष्यामि यथामति।
सामगानां हितार्थाय शिष्यबोधाय केवलम्॥ २॥

अग्न आयाहीति भरद्वाजो गायत्र्यग्निः ।
त्वमग्ने इति भरद्वाजः शंकुमतीपिपीलिकमध्या गायत्र्यग्निः।

× × ×

य उस्रिया उरु विद्यारपङ्क्तिः सोमः । स्वाध्याये विनियोगः । पारायणपाठे विनियोगः । इति वा सर्वत्र ।

Colophon—(१) इति छन्दस्यासंहितायां ऋष्यादयः समाप्ताः ॥

(२) इत्यारण्यकसंहितायां ऋष्यादयः समाप्ताः ॥

अथोत्तरसंहिताया उच्यते । उपास्मै अग्नितो गायत्री सोमः ।

End—यत्र बाणा इत्यस्या इन्द्रश्च बृहस्पतिश्च दितिश्च देवताः । मर्माणि इत्यस्या सोमवरुणदेवाश्च देवताः । भद्रं स्वस्ति न इत्येतयो- विश्वे देवाः । जपे विनियोगः ।

Last Colophon—इति श्रीविष्णुमात्मजशिवरामविरचिता आर्चिकत्रयस्य ऋषिछन्दोदेवताः समाप्ताः ॥

Here the author's name is written in a different hand.

Post-Colophon—संवत् १९११ नामाहा वद १४ ने गुरुये लिपीकृतं त्रवाडी धनजी सूनु मया शङ्करेण लिखितमिदं पुस्तकम् । शुक्र- जयानन्द विदमान बजी भाइकस्य पठनार्थं लखीदत्वा ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥

श्रीहटकेश्वर सत्य छे ॥

28

9805 D. गायत्रविधानम् ।

Gâyatravidhânam

By Śunga.

This work gives the various modes of chanting the Prastâva and Patihâra of the Gâyatra Sâman when it is sung in different metres of the Riks. It is in the form of Sûtras.

Beginning—ओं नमः सामवेदाय । पद्यो गायत्रस्य तद्विविद्वा प्रस्तावः । अष्टाक्षरो वा त्रिष्टुब्जगतीषु । अन्तस्त्योकार. । स्वरात्प्रभृति । ऋगन्तश्च । यथर्वा । ओकारस्तु मकारान्त पूर्वे । नैकेषाम् । परमुप्ता-तौकारेण नानाक्षरस्थान् स्वराननुसदर्पन्मनसर्वेमनधानन् ॥

Colophon—इति गायत्रविधाने प्रथमा खण्डिका ।

End—पाशब्दः पशब्द. मावृत उपान्त्ये शुचिवन्धु पावक इति । शौङ्ग गायत्रविधानम् । शौङ्ग गायत्रविधानम् ।

Last Colophon—इति गायत्रविधाने तृतीया खण्डिका ॥
गायत्रविधान समाप्तम् ॥

29

9916 C. गायत्रविधानभाष्यम् ।

Gâyatravidhânabhâshyam.

This is a commentary on the work described above

See Stein P. 15.

Beginning—श्रीगणेशाय नमः । ' पचो गायत्रस्य तद्विविष्ठा प्रस्ताव इतीदं सूत्रम् । अग्नतूपोद्घातं प्रति शास्त्रसमाम्नानारंभः । प्रयोजनं वक्तव्यम् । किमिदं शास्त्रं किमर्थं च । किमर्थञ्च शास्त्रारंभः शास्त्रेचास्य सूत्रस्येति । उच्यते । गायत्रविधानं नाम परिशेषः । गायत्रं नाम साम । तस्येदं विधानं परिशेषसंज्ञकं तस्येदमादिमं सूत्रम् । पचोगायत्रस्य । तदस्य गायत्रस्य साम्नो ब्राह्मणं निर्वचनाभिधायकं ' प्राणो गायत्रं तद्यदेतत्प्राणं सन्तनोति × × × ×
पद्रे भवः पदः । गायत्रस्येति सामनिर्देशः । तद्विविष्ठेति पर्वनिर्देशः । तद्यथा-उपास्मै गायता नरा इति । अत्रोच्यते ।

End—अष्टाक्षरो वा त्रिष्टुब्जगतीष्विति विभाषायां यदा अष्टाक्षरः प्रस्तावो भवति ऋगन्ते वा अष्टाक्षरमवशेषयति तदा इदमक्षरं पादइत्यन्तर्भवति । अन्त-उपान्त्यत्रोपपद्यत इति । उपान्त्यमेव पद्यावृतो भवति । तदा पादाब्दः पदाब्दमापद्यते । तदर्थमस्य ग्रहणम् ॥ श्रीं गायत्रविधानम् । श्रीं गायत्रविधानम् ॥ शुक्लेन कृतं । शुक्लो नामाचार्यः । तेन कृतम् ॥

Last Colophon—इति गायत्रविधानभाष्ये तृतीया खण्डिका समाप्ता ।

इति शुक्लाचार्यकृतं गायत्रविधानं नाम सूत्रं सभाष्यं संपूर्णम् ॥

30

2446 A. गीतिकल्पम् ।

Gitikalpam.

By Râmaśukla.

This work deals with the different modes of chanting the Prastâva, and serves as a guide to the recitation of

the Prastotar. This MS begins with the 2nd leaf. *See* Stein P. 15.

Beginning—यात्यमातेयत्वः पूर्वं जराबोधीयम् । जराबोधद्वितीयं धान्तीऽथ्वं नत्वा धारयन्तीये आ......प्रिव आधः स्वारसैन्धुक्षितं तृतीयमैडसंधुक्षितं चेद्वयज्ञामदैन्यमग्निहितग्मेन तृतीयं यामे...त्वरे अग्ने मृडकाशी तश्वं न आर्घं गोरां गिरं संकस्य द्वितीयं यज्ञात्यं यज्ञायज्ञियम ।

End—अग्नेर्व्रतमग्निर्मूर्धा भ्राजमग्न आमूःऽयाभ्राजमग्निर्मूर्धा विकर्णं विभ्राड्भासं भक्षस्य महादिवाकीर्त्यं विभ्राड्वान्तः स्तिमाविद्यामयपक्षे- फारादी द्वौ प्रस्तावाघख्यासेषु पुरीषपदेषु जारापर्थं प्रस्तावो यघनात् षष्ठः ॥ २४ ॥

प्रास्ताविक्येव गीतिस्स्याद्दैच्छन्दसेषु सामसु ।
वक्षियोत्तरयोर्द्विः स्याद्रथन्तरे बृहत्यपि ॥

प्रस्तोतुर्मोहनाशाय गीत्याख्याबोधसिद्धये ।
चकार रामशुक्लाख्यो गीतिकल्पं सलक्षणम् ॥

Colophon—इति गीतिकल्पं नाम प्रथमप्रपाठकः समाप्तः ।

इति गीतिकल्पम् ॥

Evidently, the Gitikalpa is not the first Prapâṭhaka of any work. But the scribe seems to impress that this is the first chapter of the Pushpasûtra which begins on fol. 7a of this No. *See* No. 74 on P. 31.

31

589. चतुर्विंशतिपदसूत्रम् ।

Chaturvimśatipadasûtram.

It is a collection of every 23rd and 24th Pada of the Vâjasaneyisamhitâ belonging to the Mâdhyandinaśâkhâ. This is useful for the reciters, and help them in keeping the whole Samhitâ in memory.

Beginning—श्रीगणेशाय नमः । अथ चत्वारिंशत्पदसूत्रप्रारंभः । हरिः ओम् । इषे त्वा । वस्तेन । माह्वा । भागं सोमेन । युनक्ति सः । धूर्वं धूर्वन्तम् । क्रमतामुरु । अरातये त्वः । प्रसव उत् । वृत्र तूर्यं ।

End—ईशा वास्यम् । शतꣳसमाः । ये के । दधाति तत् । आत्मानं ततः । अव्रणमस्नाविरम् । तमो ये । तद्वेद । शरीरमीम् । खं ब्रह्म ॥ ३९ । २० । २१३ ॥

Colophon—इति चतुर्विंशतिपदसूत्रं समाप्तम् ॥

32

8963. छन्दःपरिभाषा ।

Chhandaḥparibhâshâ.

This work explains the Vedic metres according to the Paribhâshâ of Kâtyâyana's Sarvânukramaṇikâ, and gives one example for every metre.

Beginning—श्रीगणेशाय नम । प्रथम छन्दस्त्रिपदा गायत्री । उदाहरणम् । शुमासवणी धृत ॥ ८ ॥ ८ ॥ ८ ॥ पदपङ्क्तिः ॥ आभिष्टे अद्य । ५ । ५ । ५ । ६ । अथवा पदपङ्क्ति. । अग्ने तमद्य । ५ । ५ । ५ । ४ । ६ । उष्णिग्गर्भा । तामे अश्वियानाम् । ६ । ७ । ११ । पाद-निचृत् । त्वावत पुरूवसो । ७ । ७ । ७ । अतिनिचृत् । पुरूतम पुरू-णाम् । ७ । ६ । ७ । यवमध्या । सस्तुन्वेयो वसूनाम् । ७ । १० । ७ ।

End—अतिशक्करी । साकं जात क्रतुना साकमोजसा ववक्षिथ । १६ । १६ । १२ । ८ । ८ । अष्टिस्त्रिकद्रुकेषु महिषो यवाशिरं तु-विशुष्म. । १६ । १६ । १६ । ८ । ८ । अत्यष्टी अग्नि होतारमन्ये दास्व-तम् । १२ । १२ । ८ । ८ । ८ । १ । ८ । धृति. । अयमेह इंद्रवायुहिश्रु-धीनः । १२ । १२ । ८ । ८ । ८ । १६ । ८ । अतिधृति. । १२ । १६ । ८ । ८ । १२ । ८ । ८ ।

33

9796 A छन्दोविचितिवृत्तिः ।

Chhandovichitivrittih.

By Hrishikeśāśramin

It is an elaborate commentary on the Chhandovichiti, a work on the metres of the Sâmaveda, and comprises the first part of the Nidânasûtra of Patañjali. Hrishikeśa, the commentator otherwise known as Pettâśastri, describes himself as the grandson of Ranganâthâdhvrin who commented on the Padamañjari and Siddântakaumudi, and as a resident of Tanjore in the Madras Presidency.

Beginning—शुभमस्तु । हरिः ओम् ।

श्रीमूलस्थानसर्वंशमखिलाण्डेश्वरीमियम् ।
सनातनमहं वन्दे सीतारामौ च सर्वदा ॥

प्रधानसूत्रकारादीन् मुनीन्द्रान् सायणादिकान् ।
राणायन्यादिकान् सम्यगाचार्यान्प्रणमाम्यहम् ॥

येन कुण्डरमाणिक्यग्रामरत्ननिवासिना ।
रङ्गनाथाध्वरीन्द्रेण मकरन्दाभिधा कृता ॥

व्याख्या हि पदमञ्जर्याः कौमुद्याः पूर्णिमाभिधा ।
शिरसा तमहं वन्दे मम मातामहं गुरुम् ॥

यावद् पिङ्गलनागाद्यैः छन्दोविचितयः कृताः ।
तासां पिङ्गलनागीया सर्वसाधारणी भवेत् ॥

सर्वानुक्रमणी काचिच्छन्दोनुक्रमणी परा ।
शौनकीया तृतीयेमास्तिस्र ऋग्वेदिनां मताः ॥

यजुर्वेदविदामन्या सर्वानुक्रमणी भवेत् ।
सामगानां निदानस्था पतञ्जलिकृता हि सा ॥

वैदिकाचारनिरतविद्वद्दीक्षितमण्डिते ।
तञ्जापुराभिधग्रामे रम्ये वास प्रकुर्वता ॥

सत्कौशिककुलश्रीमत्प्रयागकुटिकेन च ।
प्रधानसूत्रप्रमुखैः षड्भिस्सूत्रैस्सह स्फुटम् ॥

अधीतिना सामवेदे साङ्गे तद्भाष्यवेदिना ।
प्रतिपादयता कुत्र साम्नां पर्वणि पर्वणि ॥

श्रौतस्मार्तप्रवीणेन नाराय्यणसुतेन हि ।
पेत्ताशास्त्र्यभिधानेन हृषीकेशेन शर्मणा ॥

वृत्तिर्निदानगच्छन्दोविचितेः क्रियतेतमाम् ।
प्रीयन्तामनया वृत्त्या सामवेदविशारदाः ॥

यथेयं भासता लोके तथाङ्गीभियतां च तैः ॥

अथ भगवान् छन्दोविचितिकारः पतञ्जलि श्रोतृबुद्धिसमवधानाय वक्ष्यमाणार्थं सगृह्य प्रतिजानीते-अथातश्छन्दसा विचयं व्याख्यास्याम इति।

End—न केवल छन्दोलोकादिप्राप्ति किन्तु आनन्त्याद् ब्रह्म च प्राप्नोतीत्याह-आनन्त्यादश्नुते श्रियमिति। श्रियमिति स्पष्टोऽर्थः। द्विरुक्तिः पटलसमाप्तिसूचनार्था।

Colophon—इति पेत्ताशास्त्रिविरचितायां छन्दोविचितिवृत्तौ द्वितीयपटले तृतीय खण्ड। द्वितीय पटलोपि समाप्तः ॥

34

9788 C छन्दोविचितिवृत्तिः-तत्त्वसुबोधिनी।

Chhandovichitivritti-Tattvasubodhini.

This commentary is similar to the work described above The commentator states in the beginning that he is commenting on the Nidânasûtra as a whole But the codex ends with the commentary of the Chhandovichiti, which is the first part of the Nidânasûtra

Beginning—विघ्नेशं भारतीमीशमाचार्यं च पतञ्जलिम्।
नत्वा निदानसूत्रस्य वृत्तिं कुर्वे यथामति ॥

क सूक्ष्ममतिगभीरं क्वैतद्बुद्ध्या नु सादसम्।
तातप्रसादः कुरुते वृत्तिं तत्त्वसुबोधिनीम् ॥

अथातः छन्दसा विचयं व्याख्यास्याम इति। अथशब्द आनन्तर्यार्थकः। अतः शब्दो हेतोर्वृत्त्य। तत्र प्रतिपत्तॄणामेतत्सूत्रप्रवृत्तिनियमेन यदनन्तरं तदनन्तरम्। सूत्रार्थश्च ऋक्सामयजुर्ब्राह्मणार्थरूप इति तेषामध्ययनानन्तरं

सूत्रार्थप्रतिपत्तिहेतोरध्ययनस्य वृत्तत्वात् तेऽनुष्ठानायार्थविशेष जिज्ञासमानानां । विचयं विचीयते निर्णीयतेऽनेनेति व्युत्पत्त्या ज्ञानसाधनीभूतं सूत्रं व्याख्यास्यामः । स्पष्ट करिष्याम इत्यर्थ ॥

End—छन्दोविचितिज्ञानस्य फलन्दर्शयति

छन्दसां विचयं जानन् यश्शरीराद्विमुच्यते ।
छन्दसामेति सालोक्यमानन्त्यां श्रियमश्नुते ॥ इति ॥

द्विरुक्तिः पटलसमाप्त्यर्थः ।

Colophon—इति निदानसूत्रवृत्तौ द्वितीयः पटलः ॥

35

8005 B. जटासन्धिलक्षणम् ।

Jaṭâsandhilakshaṇam.

It is a Lakshaṇagrantha in versified form wherein the Sandhis of the words repeated in the recitation of Jaṭâ are treated of. It is also called Nyâyapañchâśat.

Beginning—श्रीगुरुभ्यो नमः ।

प्र(द्वि)जादिभि प्रार्थनीयं गजास्यं गिरिजासुतम् ।
सुजागरूकं सूर्याभं भजामि शरणं सदा ॥ १ ॥

शारदेन्दु .. ..ज्योत्स्नां सर्वविद्याविशारदाम् ।
शारदां प्राप्य वक्ष्यामि जटायां सन्धिलक्षणम् ॥ २ ॥

क्रमेण द्विपद् ब्रूयाद्व्युत्क्रमेणोत्क्रमेण च ।
सलक्षणं सर्वमन्धो जटा .. ..च्यते बुधैः ॥ ३ ॥

End—......यो विप्रः समाहितमनाः शुचिः ।
अटां नित्यमधीयानोऽक्षय्य फलमश्नुते ॥

यल्लक्षण न्यायबलं हि कार्यं वृत्तान्तरूपेण बलं .....तस्य ।
टीकाकृतां यस्य जटाभिलाषाशुचोपनीतस्य तदर्थसिद्धये ॥

Colophon—न्यायपञ्चाशत्समाप्तिमगमत् ॥

36

6381 B. तैत्तिरीयपदस्वरलक्षणव्याख्या ।

Taittiriyapadasvaralakshaṇavyākhyā.

It is a work dealing with the accents of the words of the Krishṇa-Yajurveda. The correct title of this work seems to be Svarapañchāśat with Bhāshya *See.* No 125 on p. 39 and OL. II. 1018, Tri 1. 1. A, 95 (1).

Beginning—अतीन्द्रियार्थविज्ञानं प्रणम्य ब्रह्म शाश्वतम् ।
तैत्तिरीयपदादीनां वक्ष्यामि स्वरलक्षणम् ॥

अनेन श्लोकेन परापरब्रह्मप्रणामपूर्वकं मारिप्सितग्रन्थस्याभिधेयमाह—वेदोऽपि शाश्वतं ब्रह्म तदतीन्द्रियार्थविज्ञाने कारणम् ।

End—स्वरपदस्य । शीक्षां व्याख्यास्यामः । सहस्रशीर्षं देव । सखा एव पुरुषोऽसरसमय इत्यादि । अभ्येषीतिवचनं अन्यत्रापि क्वचित्पदाध्ययनरहिते व्यत्ययं सूचयति । यथा पितृमेधादि-प्रश्नयोर्चे चिकितुषे ब्रनाय । सत्यं न ब्रुवो भूत्वा सयाचस्पते इदिति व्याहरत् ।

Colophon—इति स्वरपञ्चाशद्भाष्य समाप्तम् ॥

37

11651. द्विपदा । Dvipadâ.

This is an index of the Riks which have either two Pâdas or one Pâda, and of those Riks with four Pâdas which are considered as two द्विपाद् Riks in the Rigvedsamhitâ. This calculation is needed to complete the number of Âhutis in the Samhitā-Svāhâkâra.

Beginning—श्री गणेशायनमः । अथद्विपदा । प्रमन्महेश वसाय नो० ॥ वर्ग ८ । पश्वानतायुं गुहाच ततम् । १ । चतुर्दशवर्गपर्यन्तद्विपदा । १४ । ६ । द्विपदा इति । अग्न ओजिष्ठमाभर । अग्ने त्वं नो अन्तमः । द्विपदा ॥ द्विपदा ॥ ४ ॥ त्वं हि क्षैतवद्यशः ॥ विद्वेषां सीनुहि वर्द्धे ॥ द्विपदा ॥

Colophons—(१) इति द्विपदा समाप्ता ॥

अथ एकपदाप्रारभः । वैश्वानराय मीळुषे । अस्तिक्यां यजमानो न होता । एकपदा ॥

(२) इति एकपदा समाप्ता ॥

प्रश्नः पान्त रघुमन्यवोऽन्ध । या अध्यामध्येती-अर्धारियाचाऋचा।

End—पुरोजितीवो अन्धस. । अया रुचा हरिण्या पुनानो० तो० अर्धारिया ची इति द्विपदा ची संख्याव। एकपदा ची संख्याव दो अर्धारिया ची व तीन अर्धारियाची संख्या समाप्ता ॥

38

10885. धारणम् । Dhâraṇam.

By Sabhâpati.

This is a Lakshaṇagrantha for the Jaiminîyaśâkhâ of the Sâmaveda, where the Gâna of the Sâmans is treated of. It contains four Parvans, to wit, Âgneya, Aindra, Pavamâna, and Âraṇyaka. The present MS is much injured in the beginning and at the end.

Beginning—...............रध्यचै चा शरटादि शरचा शचिरटा-टिकिरचरट्ट खाशिखश । म । अग्न आयाहि वी । तुषि टूतशर चाश त्रि ताराटच खाशिर............ती शर । च्युपशरखिण रट श ह्र ठ्ठ शरा शहाइ । ठ्ठ । म । त्वमग्ने । त्वमग्नाइ । पातृशपीरुतारलत काचकटाख ठ्ठ ट ठ्ठा श हो इया । म । अग्निं दूतम् ॥

Colophon—(१) आग्नेयं षडशीतिसामानि । इति सभापतेः कृतौ धारणे आग्नेयं पर्व समाप्तम् ।

(२) इति सभापतेः कृतौ धारणे प्रतानि पर्व समाप्तम् ।

End—म । तत्सवितुर्वरेण्योम् । चकटीसद्चकक्रच श । टा च टा च सटचकारि चश ॥ हरिः ओम् ।

Last Colophon—इति सभापते. कृतौ धारणे छन्दस्समाप्तम् ।

'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।

नाम्नामप्येवं । तद्यथा प्रत्यक्षक्रियाणि, प्रकल्प्यक्रियाणि, अविद्यमान-क्रियाणि । तत्र प्रत्यक्षक्रियाणि कारको हारक इति । प्रकल्प्यक्रियाणि गौरश्व इति । अविद्यमानक्रियाणि डित्थः कपित्थ इति । एवं दुर्गः ।

Last Colophon—इति स्कन्दस्वामिकृतायां निरुक्तटीकायां षष्ठोऽध्यायः ॥

41

9795. फुल्लपोतम् । Phullapotam.

By Gaṇeśa.

It is a commentary on the Pushpasûtra of Vararuchi which is also known especially in the South, as Phullasûtra. *See* Burnell 10b and HPS. II. 1323. The edition of Satyavrata Sâmâśramin and Richard Simon ascribe the text to Pushpamuni, while our Southern MSS, Burnell's MS, and the present commentary, ascribe it to Vararuchi, and Weber's *Nos. 303-305 to Gobhila.*

All the commentaries, here available, of Ajâtaśatru, Râmakrishṇa and Gaṇeśa begin only from the 3rd Prapāṭhaka of the printed edition. But Gaṇeśa alone comments on the first two Prapâṭhakas which appear at the end This commentary is not divided into Prapâthakas and Khaṇḍikas in the same way as the text is divided It may be noted here that Ajâtaśatru's commentary runs from the 3rd Prapâṭhaka and not from the

5th as mentioned in HPS. II. 1327, Burnell's 10b, and Webers' 306

Beginning—

वन्दे वररुचिं नित्यमूहाब्धेः पारदृश्वनाम् ।
पोतो विनिर्मितो येन फुल्लसूत्रशतैरलम् ॥

नमोऽस्तु नीलग्रीवाय नमो रामानुजाय च ।
नमो नन्दकुमाराय नमो गोविन्दयज्वने ॥

निमज्जतामूहमहांबुराशावुत्तारहेतोः कृपया गणेशः ।
आदाय फुल्लं ह्यपवादसूत्राण्याख्यादि भावेषु करोति पोतम् ॥

अथोहरहस्ययो रूह्यर्थमधीतानां पञ्चचत्वारिंशदुत्तरशताधिक सहस्रसंख्यानामामहीयवरथन्तरादीनां साम्नामूहगाने योनिवत्स्वरस्तोभाभ्यासविरामाश्च योनिवदुत्तरयोर्गीति । यद्योन्या तदुत्तरयोर्गायेदित्येव मादिसूत्रे योनिवत्स्तोभाभ्यासविरामैरूहाध्ययने प्राप्ते प्रस्तावोद्गीथ प्रतिहारोपद्रवनिधनेषु पञ्चभक्तिषु वररुचेः फुल्लसूत्रे आर्ष भावाद्यष्टादश भावेषु यानि सूत्राण्यपवादत्वेनाधीतानि तानि समस्तानि यथामति श्रुत मुहुर्मुहुर्विमृश्य सामगानां सम्यगवबोधार्थमस्माभि प्रतिस्तोत्र गृह्यन्ते । उच्चा ता इ जातामजसा. । आमहीयवम् । पादप्रस्तावः पदीनादेश इति । महासामान्यमेतत् । वृद्ध वचनात् । अथ तालव्यमा इ यद्वृद्धमिति । वृद्धो वृद्धि अतइति त्रिमात्रभूतानां वर्णानां पर्यायसंज्ञा ।

End—सिमा । प प्रे पवस्व । वा जा सा त या इ । सीमा अतिषक्ते व्याख्यात । प्रकृतिभाव इति । अतिषक्तवत्प्रकृतिभावः । × × × सिमासुचेत्यन्नाद्ययोस्स्तोत्रिययोरगतिः । सोमडपा पवस्व वाजयोरधीतः ।

Colophon—क्षुद्रं समाप्तम् ॥

फुल्लपङ्कजदलायतेक्षण वासवादिखिलदेवपूजितम् ।
अन्तरायतिमिरप्रभाकर हस्तिराजमुखमाश्रयेऽनिशम् ॥

9999. भारद्वाजशिक्षा व्याख्या।

Bhâradvâjaśikshâvyâkhyâ.

A commentary on the Bhâradvâjaśikshâ which treats of the phonetics, accents, etc. in relation to the Krishṇayajurveda. This commentary is different from that described under Nos 941 and 942 in OL. II; but the text appears to be the same as in OL though there is slight difference in the beginning and at the end.

Beginning—वृजने ज उदात्तश्चेदकारेण सहोच्यते । वृजनशब्दे जकार उदात्तश्चेदकारसहितो भवति । यथा-धियामेयं वृजिनं नीरदानुम् । सुवृजना सुविश्नु । सुपर्णमिन्द्वयां वृजनस्य गोपाम् । वृजनं दोहसे । जकार उदात्त इति किम् । × × × ×

स्तुतन्त्वनिग्यमन्त्योच्चधृतमिद्व्येनयोत्तरम् । अन्तोदात्तं स्तुतमिति पदमनिङ्ग्य चेत्तकाराकारसहितम् । इङ्ग्यस्यन्तु धृतञ्चेत् तकाराकारसहितम् ।

End—अग्न्यं तु ज्योतिरापो वा इमे पत च पग्र च ।
प्रजापतिश्च रक्षांसि प्रजापतिर्नैषेपु च ॥

एषु पञ्चस्वनुवाकेषु अन्तपद्मशब्दः । यथा अमुष्मिन्नेव तेन लोके प्रतितिष्ठन्तीयं वा ज्योतिरन्तरिक्षम् । × × × ×
सं वैनादेषिका पतामानो हि नाध्रुवा इति ॥

सं पश्यामीत्यत्र मापगातेत्याह ध्रुवा एवैना अनपगाः कुरुते ।
× × ×

भारद्वाजेन मुख्येन ऋषीणां वेदधारिणाम् ।
प्रातिशाख्यादि संवीक्ष्य शीक्षा विप्रसुखाय च ॥

ऋषीणां प्रातिशाख्यादिवेदलक्षणकृतां मुनीनां मुख्येन श्रेष्ठेन ।
अयं तेभ्य अतिवृद्धिमानित्यर्थः । × × ×
अस्य लक्षणस्य शीक्षेति स्त्रीलिङ्गत्वेन नामोक्तत्वात् सर्वेषां विप्राणां
प्रियेत्यर्थः । पुंसां उत्तमस्त्रियां यथा प्रीतिः तथेति शीक्षाशब्दप्रयोगः ।

Colophon—इति भारद्वाजशिक्षा समाप्ता ॥

43

7409. मात्रालक्षणम् ।

Mâtrâlakshaṇam.

A Pariśishta of the Sâmaveda dealing with the मात्रा or the duration of time to pronounce the vowels at the time of reciting the Sâmans. Stobhânusamhâra, (mentioned in Oxf. 378a and P. 144 of Max-Muller's *History of Ancient Sanskrit literature*) the beginning of which agrees with the present work, might be the other name of the Mâtrâlakshaṇa. For description *see* below.

44

11985. मात्रालक्षणव्याख्या 'विवरणम्'

Mâtrâlakshaṇavyâkhyâ 'Vivaraṇam'.

A commentary on the work mentioned above.

Beginning—ओम् । नमः सामवेदाय ।
अथातो ह्रस्वदीर्घप्लुतमात्राण्यक्षराणि व्याख्यास्यामः । सामसु ॥

मात्रालक्षणं नामेदं शास्त्रं परिशिष्टं शास्त्रं परिशिष्टम् । शास्त्रस्य परि-शिष्यमाणमर्थं वदतीति परिशेषः । कस्यार्थः परिशिष्यते मात्रालक्षणं वाच्यमिति । कुत एतत् । स्मृतितः प्रतीयते × ×

× तस्मादेवमादीनि परिशिष्यन्त इहानुक्तानि तत इदमारभ्यते । ह्रस्वदीर्घप्लुतमात्राणि । मात्राशब्दः परिमाणवाची । ह्रस्वदीर्घप्लुतपरि-माणान्यक्षराणि व्याख्यास्यामः कथयिष्याम इत्यर्थः । साम्नसु सामविषये ।

End—एवमादिषु मात्रार्धमात्रिक अणुमात्रा तेन संपद्यते । कालो न शक्यते संपादयितुं प्रतिज्ञामात्राज्ञानिहित तथोक्तम्-शास्त्रान्तरेऽपि—तत्पुनरप्रसिद्धं विभ्रावस्थादयश्च गन्धर्वास्सामसु निभृतं करणं स्वरसौ-क्ष्म्यात्तेऽपि हि न कुर्युः ।

Colophon—इति मात्राकण्ठिकाविवरणं समाप्तम् ।

Post-Colophon—संवत् १५०४ वर्षे मार्गशीर्षे वदि ७ सप्तम्यां तिथौ बुधदिने अद्येह वटपद्र वास्तव्य आभ्यन्तरनागरज्ञातीय त्रिवेदेसुत भट्टके देवराजेन लिखितम् । यादृशं पुस्तकं etc.

45

4543. (माध्यन्दिनीयसर्वानुक्रमणीपद्धतिः ।)

(Mâdhyandiniyasarvânukramaṇîpadhatiḥ.)

This work is an index to the Rishi, the metre, and the Devata of the Mantras of the Suklayajus-Saṃhitâ of the Mâdhyandiniya Śâkhâ, and states the applications of the Mantras required in the Śrauta rites. This work is obviously different from that of Yâjñika Śrideva described in Peters. 5. Ex. 73, and here as No 86 on page 33, though the subject treated of is the same. The first and the last leaves are missing in the present MS.

Beginning—मातरिश्वन इत्यस्य परमेष्ठयादय उखाद्दे ० प्राजापत्या जगती । स्थाल्यधिश्रयणे विनियोगः । वसोः पवित्रमित्यस्य परमेष्ठयादय.........वायुर्देवता । यजुः उखोपरि पवित्रनिधाने वि० । देवस्त्वेत्यस्य परमे० । पयोदे साम्नी । त्रिष्टुप् । उखायामासिच्यमाने पयसि जपे वि० । कामधुक्ष इत्यस्य परमे ० । प्रश्नो दैवी बृहती । दोग्धारं प्रति गोरभिप्रश्ने वि० ।

Colophon—इति संहितायां प्रथमोऽध्यायः ।

> कृष्णोऽसीत्यस्य पर० । इध्मदे० । आयुर्युष्णिक् ।
> इध्मप्रोक्षणे

End—ईशा वास्यम् । कुर्वन्नेवेह । असुर्या नाम । आत्मा दध्य० ऋषिः । आत्मा देवता । अनुष्टुप् । अनेजदेकमित्यस्या दध्य० ऋषिः । आत्मा दे० । × × × ओमिति ब्रह्मणो नामनिर्देशः । खं ब्रह्मेत्येतस्य × × × अन्त आकाशरूपस्य ब्रह्मणोध्याने विनियोगः । छन्दःपुरुषस्य शरीरन्यासः । गोतमाय नमः । दक्षिणचक्षुषि । भरद्वाजाय नमः सव्यम् । विश्वामित्राय नमः । दक्षिणे श्रोत्रे × × × इन्द्राय नमः उदरे । जगते नमः आदित्याय नमः श्रोण्योः । अतिछन्दसे नमः । प्रजापतये नम । शिश्ने । यज्ञायशिवाय नमः । मेध्रा ।

46

12022. यजुर्विधानम् ।

Yajurvidhânam.

This work states the applications of the Yajurmantras in several काम्य rites, and indicates the merits obtainable thereby. The MS contains seven Adhyâyas and a portion of the 8th Adhyâya. This work may be the same as

that registered by Aufrecht in his *Cat. Cat.* which is in nine Adhyâyas. The Yajurvidhâna, described under Nos. 895 HPS. II, and No. 272 D.C., I. I., and as No. 90 on p. 84 of this volume, contains only five Adhyâyas which are divided into six in the printed edition (*Vide* B S S. Śikshâsaṃgraha). The first six Adhyâyas of the present MS agree with the printed edition. The Bṛihadyajurvidhâna, described under No. 271 D. C, I. I, which is complete in 7 Adhyâyas, is different from the present MS

Beginning—ओम् । नमो यजुर्वेदाय । अथातो मन्त्राणुकल्पनम् यसिष्ठादिभिः ब्रह्मर्षिभिरनुष्ठितमनुव्याख्यामः । नान्या ब्राह्मणस्य काचिद्धमार्जेनक्रिया विद्यते । होमानां यज्ञानाञ्चावश्यं क्रिया etc ।

Colophon—इति यजुर्विधाने पञ्चमोऽध्यायः ।

Beginning of the 6th Chapter—परं मृत्यो इति बालानां गुर्वि-(र्भि)णीनां हस्ते सूत्रबन्धो जपहोमशक्तितः कार्यः ।

End of the 6th Chapter—अथवा सर्वमन्त्राणां विस्तरेण पृथक् पृथक् ।

Colophon—इति यजुर्विधाने षष्ठोऽध्यायः ।

Beginning of the 7th Chapter—अथातः कामनि(नै)मित्तिकानां प्रदेशकामनिमित्तप्रादुर्भावादेरनित्यत्वात्काम्यानां प्रागारंभाच्छरीरशुद्धये दीक्षोपसत्पतिसवनमुदकोपस्पर्शनं शन्नो देवी आपोऽस्मान् ।

Colophon—इति यजुर्विधाने सप्तमोऽध्यायः ।

Beginning of the 8th Chapter—अथाधश्चोप्याहारदोषादिनिग्रहदोपात्प्रतिग्रहदोषाच्चात्मानमसीदन्त ।

End—समिधोऽभ्याधाय शतरुद्रिय जपेत् । प्रश्नप्रति प्रश्नयो........ इप इति पातालेचात्मान कुर्यात् मूते मूतेभ्य

47

9291. याज्ञवल्क्यशिक्षा ।

Yājñavalkyaśikshā

This Sikshā is a summarised recension of the Yājñavalkyaśikshā, though some portions are also incorporated from other Sikshās This work begins from the Adhyayanavidhi of the original Sikshā.

Beginning—अथ शिक्षां प्रवक्ष्यामि याज्ञवल्क्यपरिस्फुटाम् ।
यजुर्वेदस्य मन्त्राणां सम्यक्पाठस्य सिद्धये ॥

प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुपूर्व्येण ततो वेदं समारभेत् ॥

हस्तौ तु संहतौ धार्यौ जानुभ्यामुपरि स्थितौ ।
गुरोरनुमतं कुर्यात्पठन्नान्यमतिर्भवेत् ॥

End—किञ्चिदुपयोगिनी शिक्षात्र लिखिता । अन्यत्सर्वं विस्तरेण याज्ञवल्क्यकृतशिक्षायां ज्ञातव्यमित्यलं विस्तरेण ।

हकारो यत्र दृश्यन्ते रेफेणाङ्कितमस्तके ।
स्वरभक्तं प्रयुञ्जीत संयोगेनैव कारयेत् ॥

यथा मीनक्षयः पक्षी उत्पतन्ति पतन्त्यपि ।
एवं स्वरं प्रयुञ्जीत कल्याण इति निदर्शनम् ॥ इति ॥

× × ×

उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम् ।
निहतन्तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥

Colophon—इति शिक्षा समाप्ता ॥

उदात्तान्निहितः स्वारः स्वरितात्प्रचयो भवेत् ।
उदात्तात्स्वरितात्पूर्वो नान्यमापद्यते स्वरम् ॥

that registered by Aufrecht in his *Cat. Cat.* which is in nine Adhyâyas. The Yajurvidhâna, described under Nos. 895 HPS. II, and No. 272 D.C., I. I., and as No. 90 on p. 84 of this volume, contains only five Adhyâyas which are divided into six in the printed edition (*Vide* B S S. Śikshâsamgraha). The first six Adhyâyas of the present MS agree with the printed edition. The Bṛihadyajurvidhâna, described under No. 271 D. C, I. I., which is complete in 7 Adhyâyas, is different from the present MS

Beginning—ओम । नमो यजुर्वेदाय । अथातो मन्त्रानुकल्पनम घसिष्ठादिभिः महर्षिभिरनुष्ठितमनुव्याख्यामः । नान्या ब्राह्मणस्य काचिद्धनार्जनक्रिया विद्यते । होमानां यज्ञानाञ्चाघश्यं क्रिया etc ।

Colophon—इति यजुर्विधाने पञ्चमोऽध्यायः ।

Beginning of the 6th Chapter—परं मृत्यो इति धात्रानां गुर्वि-(गर्भि)णीनां हस्ते सूत्रबन्धो जपहोमशक्तितः कार्यः ।

End of the 6th Chapter—अथवा सर्वमन्त्राणां विस्तरेण पृथक् पृथक् ।

Colophon—इति यजुर्विधाने षष्ठोऽध्यायः ।

Beginning of the 7th Chapter—अथातः कामनि(नै)मित्तिकानां प्रवेशकामनिमित्तमाशुभाद्यादेरनित्यत्वात्काम्यानां प्रागारंभाच्छरीरशुद्धये दीक्षोपसत्प्रतिसघनमुदकोपस्पर्शनं शन्नो देवी आपोऽस्मान् ।

Colophon—इति यजुर्विधाने सप्तमोऽध्यायः ।

Beginning of the 8th Chapter—अथाधष्योप्याहारदोषादिन्द्रियदोषात्प्रतिग्रहदोषाचात्मानमसीदन्त ।

End—समिधोभ्याधाय शतरुद्रिय जपेत् । प्रभ्रमति प्रभ्रयो........ इप इति पासालेचात्मानं कुर्यात् मूते मूतेभ्य

47

9291. याज्ञवल्क्यशिक्षा।

Yajñavalkyaśikshā

This Sikshā is a summarised recension of the Yājñavalkyaśikshā, though some portions are also incorporated from other Śikshās This work begins from the Adhyayanavidhi of the original Sikshā.

Beginning—अथ शिक्षा प्रवक्ष्यामि याज्ञवल्क्यपरिस्फुटाम्।
यजुर्वेदस्य मन्त्राणां सम्यक्पाठस्य सिद्धये॥

प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।
सावित्रीं चानुपूर्व्येण ततो वेदं समारभेत्॥

हस्तौ तु संहतौ धार्यौ जानुभ्यामुपरि स्थितौ।
गुरोरनुमतं कुर्यात्पठन्नान्यमतिर्भवेत्॥

End—किञ्चिदुपयोगिनी शिक्षात्र लिखिता। अन्यत्सर्वं विस्तरेण याज्ञवल्क्यकृतशिक्षाया ज्ञातव्यमित्यलं विस्तरेण।

द्वावपि यत्र दृश्यन्ते रेफेणाङ्कितमस्तके।
स्वरभक्तिं प्रयुञ्जीत संयोगेनैव कारयेत्॥

यथा मीनक्षयः पक्षी उत्पतन्ति पतन्त्यपि।
एवं स्वरं प्रयुञ्जीत कल्याणं इति निदर्शनम्॥ इति॥

× × ×

उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम्।
निहतन्तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम्॥

Colophon—इति शिक्षा समाप्ता॥

उदात्तान्निहितः स्वारः स्वरितात्प्रचयो भवेत्।
उदात्तात्स्वरितात्पूर्वो नान्यमापद्यते स्वरम्॥

उदात्तादनुदात्ते या मात्रां ध्रुव आरभेत् ।
उदात्तात्स्वरिते चैव क्रमाद्दक्षिणतो भवेत् ॥

Last Colophon—इति शिक्षा समाप्ता ॥

48

9911 E. लघुऋक्तन्त्रसंग्रहः ।

Laghu-Ṛiktantrasaṃgrahaḥ.

This work deals with the numerous rules regulating the Sandhi of words in the Ṛiks of the Sāmaveda. It seems to be a concise form of an unknown work dealing with the same subject. A list of contents is given at the end.

ब्रह्माणं शङ्करं विष्णुं व्यासश्चान्यान्मुनीश्वरान् ।
नमस्कृत्य करोम्यथ लघुऋक्तन्त्रसंग्रहम् ॥

अथ वर्णोत्पत्तिः । बा कण्ठे । उरसि विसर्जनीयो वा । अकुह-विसर्जनीयानां कण्ठः । जिह्वामूलीयस्य जिह्वातालुनिश्चये । इचुयशानां तालु । × × × ह्रस्वं लघु । संयोगे गुरु । दीर्घञ्च । इति परिभाषा । सभाष्ये ऋक्तन्त्रे स्पष्टम् ॥

दीर्घास्तु संहिताकाले स्वचो व्यञ्जनपूर्वकाः ।
पदकाले प्रपद्यन्ते ह्रस्वतां ये ब्रवीमि ताः ॥

End—अथ प्रगृह्यविकारः ।

आगात्परश्च लोपोऽपि दोष आगादुदाहृतिः ।
उपाः परश्च यपाऽपि संधिमेतीति निश्चितः ।
पय उपा अपूर्व्यां च लघुऋक्तन्त्रसंग्रहम् ॥

अथ सन्धिनिश्चितोनुक्रमणिका ।
विसर्गस्तस्य लोपश्च रत्नायादेश एव च ।
आयादेशस्ततो नान्तस्तान्तस्सावर्ण्यमित्यपि ॥

ह्रस्वो दीर्घस्तथा घत्व ष्टुत्वमित्यण इत्यपि ।
गुणवृद्धी पूर्वरूप पररूपन्तथैव च ॥

× × ×

सवर्णस्य यणश्चैव वृद्धेश्चापि गुणस्य च ।
प्रगृह्यस्य विकाराश्च पञ्चैव परिकीर्तिता ॥
लघुऋक्तन्त्रसंग्रहेऽस्मिन्यनसंख्याकसधय. ।

हरि॰ ओम् ॥

49

12753 वर्णक्रमदर्पणव्याख्या ।

Varnakramadarpanavyâkhyâ

In this work the Sandhis of the letters of the Yajur-mantras are treated of, and it explains, the cases where the द्वित्व (*reduplication*) *of letters should take place*

Beginning—हरि ओम् । वर्णक्रमदर्पणम् ।
स्वरपूर्वमियाद्द्वित्व व्यंजन व्यजनोत्तरे ।
स्वरपूर्व व्यञ्जनपर व्यञ्जन द्वित्वमापद्यते ॥
यथा । उरु प्रथस्व । पशुना क्रीणामि । अग्रे गा ।
उकाररेफ उकारपकार द्वित्व रेफाकारा इत्यादि ।
स्वरमिति किम । तत्प्रवाते । व्यञ्जनपरमितिकिम् ।

End—कखयो पफयोश्चैव विसर्गो यत्र दृश्यते ।
जिह्वामूलमुपध्मानमिति वेदविदो विदु ॥

शसोरऊष्मणश्चैव विसर्गो यत्र दृश्यते ।

× × ×

पिपीलिका दीर्घसमे च मध्यमा
सवर्णता पाकयति पदैकये ।
द्रुतिरियत् सानुसृतिस्त्वसाम्ये-
ष्वथाणुमुख्यास्तु विरामकालाः ॥

श्रीसरस्वत्यै नमः ।

50

10381 K. वर्णक्रमलक्षणम् ।

Varṇakramalakshaṇam.

It is a fragmentary portion of the work which is in itself a part of an anonymous Prātiśākhya work of the Yajurveda.

Beginning—वर्णक्रमलक्षणम् ।

अ इ उ त्रिविधा वर्णाः ऋकारो द्विविधस्स्मृतः ।
लकार ए ऐ ओ औ स्युस्स्वराः षोडश संज्ञिकाः ॥

कादिमान्ताः स्मृताः स्पर्शाः अन्तस्था यादि चेतराः ।
जिह्वामूलादिहान्ताश्च षडूष्माण इतीरिताः ॥

अनुस्वारो विसर्गश्च ळ्ळोलश्च यमाः परे ।
चत्वारः स्वरभक्तिश्च षड्विवर्णाश्च वैदिकाः ॥

End—सानुनासिकयकारनिरनुनासिकयकार-इकाररेफ-ओका-इका-अका-राः । अन्तस्थै मकारवर्णम् ॥

51

8761 A. विकृतिः ।

Vikritiḥ.

A work dealing with the eleven kinds of Vedic recitation, such as the Saṃhitâ, Pada, Jaṭâ, Mâlâ, Śikhâ, etc. It is different from the Vikritivalli of Vyâḍi in which also the same subject is treated of. *See* OL. II. 958.

Beginning—श्रीः अथ संहितायां एकादश प्रकारा लिख्यन्ते ।

अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ।
जटाख्यां विकृतिं धीमान् विज्ञाय क्रमलक्षणम् ।

उदाहरणमाह बृहस्पते परि परिबृहस्पते बृहस्पते परि । परिदीय दीयपरि परिदीय ।

Colophon—इति जटोदाहरणम् ।

अथ मालोदाहरणम्—
आद्यक्रमविपर्यासावर्धर्चस्यादितोऽन्ततः ।
अर्धर्चादिं नयेदेव क्रममालेति कीर्तिता ॥
उदा-बृहस्पत्ये परि ।

End—अथ घनोदाहरणमाह—

शिखा जटा घनः मौक्त इत्यष्टौ विकृतिः पठेत् ।

उदाहरणमाह—बृहस्पते परि परि बृहस्पते बृहस्पते परि दाय दाय परि × × × रथानामिति रथानाम् ॥

Colophon—इति घनः । संहितैकादशप्रकारा लिखिताः । संहिता १ । पद २ । क्रम ३ । जटा ४ । क्रममाला ५ । क्रमशिखा ६ । क्रमलेखा ७ । क्रमध्वज ८ । क्रमदण्ड ९ । क्रमरथ १० । क्रमघन ११ । इति समाप्तः ।

Post-Colophon—संवत् १८७६ विकृतिनामाब्दे आषाढ वद १ सौम्ये ॥ शके १७४१ प्रमाथीनामाब्दे ज्येष्ठ वद १ सौम्यवासर तद्दिवे मासे गणोपनामक बालंभट्टात्मजमाधवेन लिखितमिदं पुस्तकं कार्यां संपादितं स्वार्थं परोपकारार्थम् ॥

52

11949 C. विलङ्घ्यव्याख्या-पददर्पणम् ।

Vilaṅghyavyâkhyâ-Padadarpaṇam.

By Mâdhavâchârya.

It is a commentary on the Vilaṅghya, a work which gives a list of words ending in य and ये which often disappear in the Saṃhitâ Pâtha in consequence of Sandhis. The very first sentence of the commentary shows that this Vilaṅghya is the second chapter of a work in three chapters, of which the first chapter treats of the Śamâna-sandhi, and the third or the last chapter treats of Natapara. Mâdhavâchârya, the commentator comments on all these three chapters. *See* No. 39 above and No. 109 on p. 34.

Beginning—पूर्वं लुप्तविसर्गाणि पदान्यकारादिक्रमेण सम्यग्लक्षयित्वा तेनैव क्रमेण पदकाले यकारैकारान्तानि पदानि व्यक्तिविलङ्घ्यनामकेन ग्रन्थेन लक्षयितुमुपक्रमते ॥

अथ यजुस्संहितायामकाराकारपूर्वे etc. अत्रायमथशब्द आनन्तर्ये । आनन्तर्यञ्च लुप्तविसर्गपदलक्षणापेक्षया ।

End—अनिग्यान्तः । सान्निध्येन लुप्त इति गम्यते । लुप्त इति शब्द अनिग्यान्तस्सन्नकारान्तो भवत्येव । उक्तमेवोदाहरणम् । अनिग्यान्त इति किम् । विदयतो लुप्त उत । इग्यवयान्त इंग्यान्तः । इंदग्यान्तो न भवतीत्यनिङ्ग्यान्तः ।

Colophon—इति माधवाचार्ययज्वकृतौ पदवर्पणे व्यक्तिखिलद्वर्यं नामकाध्यायस्समाप्तः ।

53

10032 A. शमानसन्धिव्याख्या ।

Śamānasandhivyākhyā.

It is an anonymous commentary on the Śamāna-Sandhi which gives a list of the words in the Yajus-Saṃhitā such as have their final Visargas dropped in accordance with the rules of Sandhi.

Beginning—हरिः ओम् । शमानव्याख्यानम् ।

त्र्यध्यन्तभारतीवेध शिवयोरेकताफलम् ।
विधाविघ्नोपघाताय विघ्नानामीश्वरं स्तुमः ॥

अनेन प्रारिप्सितस्याविघ्नपरिसमाप्तये मङ्गलमाचरणोऽभीष्टदेवतां नमस्कृत्य विषयन्दर्शयति—शमानमुद्दिष्टं । शमानमिति संहिताकाले विसर्जनीयलोपिनो वैदिकस्य पदस्य पूर्वाचार्यकृता संज्ञा । तदनुशासनस्य प्रबन्धलक्षणस्येव संज्ञा । इदानीं अथ संहितायामित्यादि लक्षणं व्याख्यायते । अथ यजुस्संहितायामाकारप्लुतपूर्वो etc.

End—उपहूताः । मकारपरः हूता शब्दे विसर्जनीयो विद्यते । मपरश्चेत् उपहूता मनुष्या इत्यादि । मपरमिति किम् । उपहूता धेनुः ।

Colophon—इति शमानव्याख्यानं समाप्तम् ॥

54

8891 B. संक्षिप्तसारः । Saṅkshiptasārah.

(By Śaṅkarāchārya)

This work treats of the pronounciation of the vowels and the consonants of the Rig-Vedic alphabet in accordance with the Śikshā of Pāṇini, and similar other Śikshās. The commentator of this work states that the author of the text is the great Śaṅkarāchārya. (*See* Below)

Beginning—सर्वज्ञं सर्वकर्तारं सर्वात्मानं शिवं गुरुम् ।
प्रणम्यर्क्षु प्रवक्ष्यामि वर्णोच्चारणलक्षणम् ॥ १ ॥

वेदस्य लक्षणं सम्यग्बालानां बुद्धिवर्धनम् ।
यथोक्तं पूर्वशास्त्रेषु तथा संक्षिप्तमर्थवि(व)त् ॥२॥

द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च ।
अकारादिस्स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते ॥ ३ ॥

End—व्याघ्री यथा हरेत्पुत्रं दंष्ट्राभिर्न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ ६७ ॥

वेदो हि वर्णसङ्घातो वेदो ब्रह्म प्रकीर्तितः ।
तस्मात्तद्वेदवर्णज्ञो ब्रह्मलोके महीयते ॥ ६८ ॥

एतत्पुण्यं पापहरं मनोवाचो विशोधनम् ।
सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते ॥ ६९ ॥

Colophon—इति सङ्क्षिप्तसारः समाप्तः ॥

Post-Colophon—शके १७६० विलंबिनाम संवत्सरे कार्तिकशुद्ध ११ इन्दुवासरे गणोपनामक बालंभट्टात्मज माधवभट्टेन लिखित स्वार्थं-परार्थं च

55

8840. संक्षिप्तसारव्याख्या ।

Sankshiptasāravyākhyā.

By Vināyaka.

A commentary on the *Sankshiptasāra described above.*

Beginning—अथ सङ्क्षेपसारो लिख्यते ।

गणेशमभिवन्द्येशं शङ्कराचार्यभाषितम् ।
सङ्क्षेपसारं व्याकुर्वे सम्यक्पाठानुसारिणम् ॥

शङ्कर शङ्करः साक्षाद्ब्रह्मविष्णुसमीपतः ।
अधीत्य सम्प्रदायस्य रक्षणार्थमिमं व्यधात् ॥

शंकराख्यो द्विजो जातु महागोविन्दशंकरात् ।
साक्षात्कृत्य पठन् साकं वास्कपाणिनिशौनकैः ॥

दृष्ट्वा च वेदगांभीर्यं द्विजांश्च हानिमानिनः ।
बहुलक्षणशास्त्रस्य संक्षेपः सारमाह तत् ॥

ग्रन्थकृदाचार्योऽद्वैतवादी स्वाभीष्टदेवता नमस्कुर्वन्स्वाभिप्रायं दर्शयन्वक्ष्यमाणमर्थं प्रथमश्लोकेन प्रतिपादयति ॥ सूत्रारम्भ. ॥ सर्वज्ञं etc.× ×

End—एतत्पुण्यं पापहरं मनोवाचो विशोधनम् ।
सर्वपापैर्विनिर्मुक्तो ब्रह्मलोके महीयते ॥ ७३ ॥

शङ्कराचार्य सङ्क्षेपसार व्याख्यद्विनायकः ।
जनार्दनक्रमविदः पुत्र आम्नायवित्सुधीः ॥ ७४ ॥

Colophon—इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितः संक्षेपसारः संपूर्णः ॥ इत्याम्नायविज्जनार्दनकृतं सङ्क्षेपसारम् संपूर्णम् ॥

Post-Colophon—संवत् १८७६ विकृतिनामसंवत्सरे तथा शके १७४१ प्रमाथीनामसंवत्सरे आश्विनशुक्ल ११ दिवसे मार्थ गणेशनामकबालं भट्टात्मज माधवेन श्रीकाशीक्षेत्रे लिखितमिदं पुस्तकम् ॥

56

9911 D. सप्तलक्षणम् ।

Saptalakshaṇam.

This work contains seven Lakshaṇagranthas for the Sâmaveda, to wit,—1. Śamânam, 2. Vilanghyam, 3. Naparam, 4. Taparam, 5. Avarṇi, 6. Âvarṇi, 7. Anavagraha.

Beginning—अथ सामवेदसप्तलक्षणमारभ्यते ॥

आकारप्लुतपूर्वो यो घोषवद्व्यञ्जनोत्तरः ।
शसकारपरश्चैव विसर्गस्स तु लुप्यते ॥

Colophon—इति शमानं समाप्तम् ।

End—कयात्वन्नस्सोममहे त्वमिन्द्र प्रसमस्यतु । इन्द्रमिद्दे पवमाना अरे या दंर प्रसोऽग्निरि । अग्निर्जागात्वैंद्रयाहियमक्षे इति संख्यकाः ॥

Colophon—इति अनवग्रहलक्षणं समाप्तम् ॥

सप्तलक्षणं नामायं ग्रन्थस्समाप्तः ॥

57

6784 C, सामपरिभाषा (?)

Sâmaparibhâshâ (?)

This work deals with the significance of the letters of the alphabet used in the text of the Sâmavedagâna, and indicates the different Svaras and Parvans represented by such letters.

Beginning—अथ साम्नां क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्यपरिस्वार्यस्वरयतां पर्वणां ज्ञापकत्वेन परिभाषितैः ककारादिभिरक्षरैः पर्वादिवर्णैश्च साम्नां दीपस्थानीयो ग्रन्थ आरभ्यते । यत्र सामगा विरम्य गायन्ति तत्र विरते सामभागे पर्वसंज्ञा वर्तते । त्रिविधं पर्व एकस्वरमनेकस्वरञ्च ओमा इत्याद्येकस्वरम् । अग्न आयाहि वीतयाद्यनेकस्वरम् । अनेकस्वरन्मिश्रविधम् । × × ×

कवर्गशेषौ ळकारषकारौ । कवर्गो यकारयुक्तश्च ।
पुनः चवर्गशेषाः शषसकाराः शकारयुक्तश्च वर्णश्च ॥

रेफशेषो ळकारश्च । टवर्गशेषो यकारः × × ×
तत्र ककारः प्रथमस्वराणां तदादीनाञ्च पर्वणां ज्ञापकः । क इति प्रथमस्वरस्य ।

End—ऊहोवा इन्द्रो धेनुर्व्येज्या स्तू ष्टो । हा उवाह् तोकमाय सञ्जिते येभिर्वा यज्या द्वे दोवेगो सप्तदश सप्तमद्वितीयः । साम ॥७७॥

58

9917 A. स्वरवर्णलक्षणम् ।

Svaravarṇalakshaṇam.

By Râmânuja.

This work treats of the Vedic accents and shows the application of the seven Svaras, Shadja etc., to the Vedic letters according to the requirements of the Science of Music. The present MS breaks off in the beginning of the 4th. Adhyâya. From the first verse of the work it appears that the Saptasvarasindhu is an epithet of the author.

Beginning—

श्रौतस्मार्तविबोधिताखिलसदाचारेषु जागर्ति यो
गोत्रेष्वस्तु कौशिको विजयते श्रीश्रीनिवासः सुधीः ।
वेदाध्यायविचक्षणश्च गणने नैपुण्यभागग्रगः
श्रीमन्नैष्णवगोष्ठिकासु विजयी रामानुजस्तत्सुतः ॥ १ ॥

नत्वा मुरारिं नवनीतचोरमालोच्य कुह्वादिमवेदलक्षणम् ।
सङ्क्षिप्य सप्तस्वरसिन्धु नामा कुर्वे च सोऽहं स्वरवर्णलक्षणम् ॥२॥

सप्तस्वरैस्समस्तैर्यो जगदेतच्चराचरम् ।
संजीवयति विश्वात्मा स नो विष्णुः प्रसीदतु ॥ ३ ॥

वेदजालजलाकीर्णं छन्द.कल्लोलसंयुतम् ।
तन्द्राग्राहान्वित वन्दे चतुर्वेदमहार्णवम् ॥ ४ ॥

× × ×

रूपाक्षरमिदं प्रोक्तमकारादौ परिस्मृतम् ।
यकारादि नवानान्तु वर्णाक्षरमिहोच्यते ॥ ७ ॥

कादिमान्तं पञ्चवर्गवर्णमित्युच्यते बुधैः ।
एवं विदित्वा वेदार्थं वर्णज्ञानं वदेत्सुधीः ॥ ८ ॥

× × ×

The first Adhyâya contains 65 Sûtras, 46 among them being the Sûtras of the Taittiriya Prâtiśâkhya.

अथ वर्णसमाम्नायः । १ । अथ नवादितः समानाक्षराणि । २ । द्वे द्वे सवर्णे । ह्रस्वदीर्घे । प्लुतः पूर्वम् । षोडशादितः स्वराः ।

Colophon—सप्तस्वरसिन्धुनामलक्षणे प्रथमोऽध्यायः ॥

जातिः । चत(षक) श्रुतिस्वरा विप्रा. द्विश्रुती क्षत्रिया मताः ।
वैश्यौ त्रित्रिश्रुती(ति:) ज्ञेयः शूद्रावन्तरकास्स्वराः ॥

स्वरदेवता ॥ वन्ही ब्रह्मसरस्वत्यः शर्वश्रीशगणेश्वराः ।
सहस्रांशुरिति प्रोक्ताः क्रमात् षड्जाधिदेवताः ॥

Colophon—सप्तस्वरलक्षणनामग्रन्थे द्वितीयोऽध्यायः ॥

अथ ऋग्यजुस्सामाथर्वणवेदानां सङ्गीतादिशास्त्रोक्तैः अकारादिव-र्णानां सर्वाक्षरैः षड्जादिसप्तस्वरमुच्यते ।

रूपवर्णाक्षरअंद्वयर्णपञ्चक...त्रयः ।
तथा सप्तस्वरत्वेन सप्तस्वरमुदीरितम् ॥

× × ×

Colophon—इति सप्तस्वरसिन्धुनाम लक्षणे तृतीयोऽध्यायः । सारगमपधनिस । सनिधपमगरिस । सरिगमपधनिस । सधपमगरिसनि ।

× × ×

End—सानिधपसा । धनिसनिधापमधा । धापा मागरि । गम पधनिसा । धनिप धपमा । मागरि गमपधनिस ॥

59

9917 B. स्वरवर्णलक्षणव्याख्या (?)

Svaravarṇalakshaṇavyâkhyâ (?)

It is a fragmentary portion of an anonymous work which seems to be a commentary on the Svaravarṇalakshaṇa described above.

Beginning—सप्तस्वरैः-तन्द्रामाद्यान्वितं पन्दे-उच्यते-रूपाक्षरमिदं-ते । अथ वर्णसमाम्नायः ।

> ध्या । स्वराविंशतिरेख(क)श्च स्पर्शानां पञ्चविंशतिः ।
> याद्यश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
>
> अनुस्वारो विसर्गश्च ≍ क ≍ पौ चापि पराकृतौ ।
> अस्य श्लोकस्य व्याख्या ।

End—शिष्टाचारः कचित्तर्हि वररुचेः सम्मतः । माति । प्रथमप्रश्ने द्वितीयः । त्रिंशत्सर्वत्र । पूर्वोक्ताध्याये-पञ्चमप्रश्ने तृतीयसूत्रे द्वात्रिंशच्चतुर्स्त्रिंशत्सूत्रे अष्टत्रिंशत्सूत्रे चत्वारिंशत्सूत्रे । नवमप्रश्ने अष्टादशसूत्रे च पठन्ति ॥

60

9917 C. स्वरसिद्धान्तचक्रम् ।

Svarasiddhântachakram.

This is a work treating of the Vedic accents. From the last colophon, (written in a different hand), it appears that the work represents the sixth chapter of the Svaravarṇalakshaṇa, described under No. 58 above. The writing of the MS is indistinct and full of errors.

Beginning—ऋग्यजुस्सामाथर्वणवेदानां स्वरनिर्णयार्थं स्वरसिद्धान्तचक्रमारभ्यते । चक्रोपाच । पङ्क्त्याशदूर्ध्वरेखाः अधश्च तथा (पञ्चाशदा) लिखेत् ।

End—पदकाले तु मूर्छनस्वरात् । संहिता कालेतु..................
इति रहस्यम् ॥

Colophon—सप्तस्वरसिन्धुनामलक्षणे षष्ठोऽध्यायः ।

61

9917 D स्वरावधानचक्रम् ।

Svarāvadhānachakram.

This work, though practically different from the previous work, agrees, nevertheless, with the same only in the beginning. This work comprises fol 24-27 which belong to a different MS.

End—एवं सप्तस्वरनिर्णयः । नारदो विशेषमाह-शतशतवर्णस्वरसाम्यम् । अकारवर्णस्य अनुदात्तत्रय स्वरत्रयम् । इवर्णस्य अनु-त्रय पाञ्चालम् । उवर्णस्य उदात्तत्रयं कटयानाम् । × × ×
एव सप्तवर्णसूत्रम् । स्थानं वर्णं स्वरं बुद्धं भाजित निश्चितं स्वरम् ।

इतः परं रावण भट्टि (मेट्) प्रोक्तस्वरपरिभाषाक्रमः ।

62

9803 C. स्वराष्टकभाष्यम् ।

Svarâshtakabhâshyam.

It is a commentary on the Svarâshṭaka which treats of the Vedic accents in eight verses. *See* OL. II. 1024. The

present MS, which contains the text also, has five more verses at the end in addition to the eight, which are generally met with. For the beginning and end of the work *See* OL II. 1024. The five additional verses are quoted below—

अभिस्वार्येव पूर्वार्धं नीचं कुर्वन्ति चोत्तरम् ।
पूर्वोत्तरन्तु नीचैकं स्वार्यं मध्ये तु कम्पितम् ॥ १ ॥

अनुदात्तमुपादाय स्वरितं ह्यवलम्बितम् ।
पुनर्निहतमागच्छेद्देव कंपविधिः स्मृतः ॥ २ ॥

उदात्तः पूर्वभागश्च परभागो निहन्यते ।
उदात्तात्कंप इत्युक्तः कुत्रचिद्वापि दृश्यते ॥ ३ ॥

जात्योभिनिहतश्चैव क्षैप्रः प्रश्लिष्ट एव च ।
एते स्वराः प्रकंपन्ते यत्रोच्चस्वरितोभयाः ॥ ४ ॥

उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनी मूलनिविष्टमूर्धा ।
अन्ते च मध्ये स्वरित धृतश्च कनिष्ठिकानामनुदात्तमेतत् ॥ ५ ॥

Beginning of the Bhâshya—एकोदात्तं पदं विद्यात्–यस्मिन्पदएकमुदात्तं दृश्यते तदेकोदात्तं पदमिति विद्यात् । तच्चतुर्विधम् । आद्युदात्तं मध्योदात्तमन्तोदात्तं सर्वोदात्तश्चेति । तेषामुदाहरणानि क्रमेण वक्ष्याम. । तद्यथा–सोमः हविषा इति व सः । एकस्वरमथापि वा ।

End—अभिस्वार्यैव पूर्वार्धेन्नियच्छन्त्येव कम्पितम् । न प्राकृतोऽप्राकृतः तस्य यस्तस्य स्वरितस्य पूर्वस्य पूर्वार्धं × × × तैरोव्यञ्जनतिरोविरामयोर्मृदुतरः प्रश्लिष्टपाठवृत्तयोरल्पतरः । ब्रह्मवादिनो वदन्ति । सोऽभिकार्योभयोस्मा इति ॥

Colophon—स्वराष्टकभाष्यं संपूर्णम् ॥ श्रीगुरुभ्यो नमः ॥

III. UPANISHADS.



63

9995 $\frac{F}{I}$ अनुभवसारोपनिषत् ।

Anubhavasâropanishad.

In this Upanishad Dakshiṇâmûrti points out to Dattâtreya that everything is unreal and that there exists only one Supreme Being and that is Himself.

Beginning:—अथानुभवसारोपनिषत् ।

ओं पूर्णमूर्ध्वमधः पूर्णं पूर्णमन्तर्बहिस्समम् ।
निर्भरं निर्मलं पूर्णं पूर्णलक्ष्यं विधीयते ॥

ओं शान्तिः त्रिः । अथातो ब्रह्मनिष्ठानां योगिनां परमहंसानां सिद्धानामवधूतानां कोऽयं मार्गः का स्थितिरिति दत्तात्रेयो दक्षिणामूर्तिं पप्रच्छ । दक्षिणामूर्तिः सहजानन्दं परमेष्ठिनं परात्परं परिस्रमेत्योवाच ।

End:—चिदाध(धा ?)रश्चिदः पूर्णः पूर्णोऽहं परिपूर्णोऽहं कियतृति निजं धीराः क्रिया केवलमुत्तमम् । नो चेदेव न सन्देहः पूर्णबोधोऽहं ब्रह्मैवाहमस्म्यहं ब्रह्मैवाहमस्मि परं ब्रह्मैवाहमस्मि परं ब्रह्मैवाहमस्मि ।
पूर्णमूर्ध्वं............लक्ष्यं विधीयते ।



1744. आत्मोपनिषत् । Âtmopanishad

This Upanishad locates the seven holy cities, the three holy villages, the nine holy forests and an equal number of holy waste-lands and fourteen centres for attaining salvation in the different parts of the human body. This is taken from some Purâna and differs from the well-known work under the same title which treats of the nature of Âtman, Paramâtman and Antarâtman.

Beginning:—श्रीगणेशाय नमः ।

सप्तपुर्यस्त्रयो ग्रामा नवारण्या नवोषराः ।
चतुर्दशैव गुह्यानि मुक्तिस्था[ना]नि भूतले ॥ १ ॥

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैते मोक्षदायका ॥ २ ॥

× × × ×

ब्रह्मरन्ध्रादयोऽयोध्या सहस्रारे हि तद्विदु ।
मथुरात्माहतं चक्रं हृदयो योगिनो विदुः ॥ १२ ॥

ये(यो)ऽष्टाङ्गाविर्भवत्कृष्णः सर्वलोकैकपालकः ।
मूलाधारे भवेन्माया सर्वाधारमयी यतः ॥ १३ ॥

End:—श्रीवाडन्वोस्तु य सन्धी (न्धि. ?) प्रभासं तत्प्रचक्षते ।
ब्रह्मरन्ध्रा बदरी प्रोक्ता नृदेहे मुनिसत्तम ॥ ३२ ॥

एतेषां स्मृतिमात्रेण सर्वस्नानफलं लभेत् ।
एतद्गुह्यं मया प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥ ३३ ॥

क्षमातीर्थं तपस्तीर्थं तीर्थमिन्द्रियनिग्रहं (ह. ?) ।
सर्वभूतदया तीर्थं ध्यानं तीर्थमनुत्तमम ॥ ३४ ॥

एतानि पञ्च तीर्थानि समपञ्चादि(नि) देहिनाम ।
वसन्ति सर्वदेहेषु तेषु स्नानं समाचरेत् ॥ ३५ ॥

Colophon—इति श्रीहिमवत्खण्डे नारायणनारदसंवादे आत्मोपनिषद(त्) सम्पूर्ण (र्ति) मगमत् । श्रीकृष्णो विजयतेतराम् ।

65

1969. ईशावास्योपनिषद्दीपिका ।

Îśâvâsyopanishaddîpikâ.

By Sachchidânandâśramin.

This is a commentary according to the Advaita system of Vedânta. The work is incomplete, and the commentary covers 9 to 14 Mantras only of the printed edition. The Mantras are here arranged in a different order. The Mantras 12-14 of the printed book are here taken as 9-11, and 9-11 of the printed book are counted here as 12-14.

Beginning.—चैव वस्तुत इति । स्मृत्यन्तरे च—

' अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम् ।
अत्र प्रमाणं वेदान्ता गुरवोऽनुभवस्तथा ' ॥ इति ।

' अन्त्याश्रमिभ्य परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टाम् ' इति श्रुतेः परहंसेभ्य परमात्मन स्वरूपलक्षणमुक्त्वेदानीं व्याकृताव्याकृतयारुपासनसमुच्चयार्थं प्रत्येकं निन्दामाह—' अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ' ।

End:—वेदान्ते परमं गुह्यं पुराकल्पप्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्राय शिष्याय(?)वा ॥

त(य)स्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति ॥

शास्त्राण्यभ्यस्यते नित्यं वाग्मित्वमधिकं भवेत् ।
उरःकठा(ण्ठा)दिशोषश्च नैतस्मादपि(धि)कं परम् ॥

इदं विज्ञाय मेधावी स्वल्पग्रन्थे सुखी भवेत् ।
सर्वभूतान्तरस्थाय नित्यसत्यचिदात्मने ॥

प्रत्यक्चैतन्ययुक्ताय मह्यमेव नमो नमः । इति ।

Colophon:—इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमन्नृसिंहाश्रमशिष्यसच्चिदानन्दाश्रमविरं(र)चिता ईशावास्यदीपिका समाप्ता । सच्चिदानन्दः शिवोऽहम् ।

नाहं कर्ता कारयि(ता)न च कार्यं
नाहं भोक्ता भोजयिता न च भोज्यम् ।
नाहं दुःखी दुःखयिता न च..........
... ... ॥

66

4527. ईशावास्योपनिषद्भाष्यम् ।

Îśâvâsyopanishadbhâshyam.

By Gopâlânanda.

This is in accordance with the tenets of the Viśishṭâdvaita system of philosophy. A commentary by Pandit Embâr Krishṇamâchârya dedicated to Gopâlânanda has been

published in Bombay in the year 1921. But the Bhâshya as found in this edition differs *in extenso* from the above MS.

Beginning—श्रीस्वामिनारायणाय नमो नमः ।

गोपालानन्दनामाऽहं कुर्वे भक्तिसुतं स्तुवन् ।
ईशावास्याध्यायभाष्यं भक्तब्राह्मणतुष्टये ॥

यजुर्वेदः स्वसंहितायां ईशावास्याध्यायमन्त्रैर्नरवृन्दं शिक्षयन्नाह-ईशावास्यमिति ।

End—मनुवचनं च—

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति ।

तथा नारदीये च—

'वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।
वेदाः प्रतिष्ठिता देवि पुराणे नात्र संशयः ॥

पुराणमन्यथा ज्ञात्वा तिर्यग्योनिमवाप्नुयात् ।
सुदान्तोऽपि सुशान्तो वा न गतिं प्राप्नुयात्सतीम् ॥
इति ॥

श्रुतिस्मृत्यनुसारेण मयार्थोऽस्य प्रदर्शितः ।
तेन तुष्यन्तु भगवांस्तदीया ये च ब्राह्मणाः ॥ १ ॥

Colophon—इति श्रीसहजानन्दस्वाम्यनुगृहीतेन तच्छिष्यस्वसेवक-त्वयुक्तेन गोपालानन्देन ईशावास्याध्यायभाष्यं उदुम्बर्यां विरचितममृत।

गिकब्रह्ममात्रसिद्धान्तस्य प्रकटितत्वात्तेनैव कैवल्यसिद्धेर्न पुनर्वक्तव्यमव-शिष्यते । तथापीशाद्यष्टोत्तरशतवेदान्तजातस्य क्रमशो न व्याख्यातत्वा-दिति मनीषया असल्लौकिकाद्यष्टदृष्टिष्वन्त्यदृष्ट्यारूढानामसल्लौकिकाद्य-ष्टदृष्टिगतद्वैतांशापह्नवसिद्धं निष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणविकले-बरकैवल्यप्रापकमनुबन्धचतुष्टयगर्भितमीशाद्यष्टोत्तरशतवेदान्तविवरणमुखेन परमाद्वैतशास्त्रं प्रतिजानीते । × × × महावाक्यपटलपर्या-लोचनया ब्रह्ममात्रं भावरूपम् । न हि तस्य निष्प्रतियोगिकत्वेन तद्व्यतिरिक्तप्रसक्तिरस्ति । यद्यसल्लौकिकादिदृष्टिमाश्रित्य स्वातिरिक्तमा-त्मत्वेन स्वोपाधिकत्वेन सत्यत्वेन व्यावहारिकत्वेन प्रातिभासिकत्वेन शून्यत्वे(न)वाऽस्तीत्येषां भ्रान्तिस्तद्भ्रान्तिभानापन्नत्वे तदपि निष्प्रतियो-गिकाभावरूपमेव स्वातिरिक्तस्य वस्तुतोऽवस्तुतो वाऽप्युपलब्धात्मकत्वात् × × शास्त्रद्वितीयं ब्रह्मेति चेन्न । शास्त्रस्य प्रबोधसमकालमुपश(शी)-लत्वान्निष्प्रतियोगिकं निरावृतं स्वमात्रमवशिष्यत इतीशावास्यमारभ्य मुक्तिकोपनिषदन्त(न्तं) वेदान्तसिद्धान्तः । एवं सिद्धान्ताविरोधमीशाद्य × × मुपनिषदः क्रमशो व्याख्यायन्ते ।

ओं श्रीमद्बिम्बाधिष्ठान × × नमः ।
यत्रापह्नवतां याति स्वातिरिक्तभिदाततिः ।
कलये तं स्वावशेषधियावस्यातुमीश्वरम् ॥

नत्वा गुरुपदं सद्यः कैवल्यपदमिच्छताम् ।
ईशावास्योपनिषदः परमाशय उच्यते ॥

शतोनद्विसहस्रमन्त्रसङ्ख्यापरिमितवाजसनेयान्तर्गतकाण्वशाखासं-हितायामिषेत्वोर्जेत्वादि द्यावापृथिवीभ्यां स्वाहेत्यन्तैकाशीत्यधिकाष्टशतोत्तर-सहस्रसङ्ख्याका मन्त्रा दर्शपूर्णमासादिकर्मकाण्डप्रकाशकाः । शेषास्तु × × साक्षात्परम्परया वा ब्रह्ममात्रप्रबोधका ईशावास्याद्येकोनविंशतिमन्त्राः ।

End—स्वाज्ञस्वज्ञदृष्टिविलसितस्वातिरिक्तात्मत्वसत्यत्वव्यावहारि-कत्वप्रातिभासिकत्वादिकलनाऽस्ति नास्तीति विभ्रमापह्नवसिद्धं ब्रह्म स्वमात्रमिति प्रबोधसमकालं विद्याऽविद्यासम्भूत्यसम्भूतिप्रातिस्विकसमु-च्चयोपासनतत्फलकलनाभासप्रशमाभावस्थानलक्षणविकलेबरकैवल्यमेव मु-

स्यामृतत्वं भवेत् । अन्यथा समुच्चयानुष्ठानफलं सालोक्यादिकमेव सिध्ये-दिति सिद्धम् । ओम् ।

Colophon—श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
ईशावास्यविवरणं लिखितं कृपया हरेः ॥

ईशाद्यष्टोत्तरशतोपनिषद्विवरणे प्राथमिकेशावास्योपनिषद्विवरणं स-म्पूर्णम् । ओं श्रीमद्विद्याधिष्ठानपरमहंससद्गुरुश्रीरामचन्द्रार्पणमस्तु । ओम् । ईशविवरणग्रन्थः षष्ठ्यधिकशतं स्मृतः । ओं श्रीरामाय नमः ।

69

6944 C. कठोपनिषद्व्याख्या.

Kaṭhopanishadvyâkyâ.

By Upanishadbrahman.

This Commentary is in accordance with the Paramâd-vaita system of Vedânta (*Vide*-the previous number).

Beginning—श्रीमद्विद्याधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः ।

श्रीमन्मैत्रेयसप्तत्याचार्यो यदाह नचिकेतसे ।
कलये तत्पदं ब्रह्म स्वाद्यशेषधियाऽन्वहम् ॥

इह खलु कृष्णयजुर्वेदान्तर्गतकठशाखायां दर्शपूर्णमासाद्यग्निचयनान्तं कर्मपटलं विस्पष्टमभिहितम् । सर्वकर्माश्रयभूतहिरण्यगर्भोपासनानि चाभि-हितानि । तत्र सकामस्य किञ्चित्किफल कर्म फलोपधायक न भवतीति वचनतः प्रातिस्विकेन कर्म ज्ञानं वा कर्मसमुच्चितज्ञानं वा यथावदनुष्ठित सत्पुनरावृत्त्यहैचन्द्रलोकप्रापकं भवति । निष्कामस्य तु तद्वैपरीत्येना-र्चिरादिना ब्रह्मलोकावाप्तिः । चित्तशुद्धिमाप्य संन्यासपूर्वकब्रह्मजिज्ञासा

चोदेति । तादृशजिज्ञासोरात्मतत्त्वप्रतिपत्तये वल्लिषट्कयुक्तकाठकोपनिषद्वाम्नायते ।

Ends:—न केवलं नचिकेता एव ब्रह्म प्राप्तः । किन्तु यथोक्तसाधनसम्पन्नश्चेदन्योऽपि मुनिर्नचिकेतवदात्मनः स्वाविद्यापदस्यापह्नवतां गतस्याधितदध्यात्मं ब्रह्ममात्रं वेद सोऽपि विरजो विमृत्युर्भूत्वाऽध्यात्मं ब्रह्ममात्रमेव भवतीत्यर्थः ।

Colophon—काठकोपनिषद्विवरणे षष्ठवल्लीविवरणं सम्पूर्णम् । ओम् । ईशाद्यष्टोत्तरशतोपनिषद्विवरणे तार्तीयिककाठकोपनिषद्विवरणं सम्पूर्णम् । ओम् ।

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
कठवल्लीविवरणं लिखितं गुर्वनुग्रहात् ॥

ओम् । कठवल्लीविवरणसमग्रग्रन्थविस्तरः ।
अष्टसप्तत्यधिशतसहस्रं परिकीर्तितः ॥

ओम् । श्रीमद्विद्याधिष्ठानपरमहंससद्गुरुरामचन्द्रार्पणमस्तु ।
ओं श्रीरामाय नमः ।

70

10058. कठोपनिषद्व्याख्या-द्विमतप्रकाशिका ।

Kaṭhopanishadvyâkhyâ-Dvimataprakâśikâ.

By Nârâyaṇagajapatirâja.

The commentator comments on the contested Mantras of the Upanishad, both according to the Advaita and the Viśishṭâdvaita systems of Vedânta. The work breaks off at the end of the first Valli of the second Adhyâya.

Beginning—श्रीरामः शरणं मम ।

' यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत् । योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ' इत्यादिभिः साधनचतुष्टयसम्पन्नाधिकारिणा नचिकेतसा आत्मस्वरूपज्ञानादन्यद्वरं न वृणीतमिति पृष्टम् । ' तं दुर्दर्शं ' मित्यादिना विद्यास्वरूपं तत्प्राप्त्युपायं च बहुधा मृत्युरुपदिदेश । विद्यायामास्तिक्यं जनयितुं भगवती सनातनी श्रुतिर्मातेव मृत्युमाचार्यं नचिकेतसं शिष्यं चोररीकृत्याख्यायिकामवतारयति ।

सह नाववतु × × मा विद्विषावहै ।

ओं शान्तिः शान्तिः शान्तिः ।

त्रिविधवचनं मनोवाक्कायजनितदोषप्रशमनार्थम् । हरिः ओम् ।

उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ ।

तस्य ह नचिकेता नाम पुत्र आस ॥ १ ॥

' उशन्ह वै वाजश्रवस इति । उशन् वश कान्ताविति धातोरुत्पन्नः । कामयमानः फलमिति शेषः । वाजेन अन्नदानेन श्रवः कीर्तिर्यस्य स वाजश्रवाः । तस्यापत्यं वाजश्रवस इति । हेति किलार्थकः । स किल ऋषिः विश्वजिता सर्वदक्षिणेन यजमानः तस्मिन्क्रतौ सर्ववेदसं ददौ । सर्वस्वं दत्तम् । तेनेत्यर्थः । तस्य नचिकेता नाम पुत्रः । आस ह । बभूव किल ॥ १ ॥

End—मुनेः मननशीलस्य आत्मैकत्वं भवति । कुतर्कभेदवृद्धिनास्तिक्यबुद्धिं चोज्झित्वा मातृपितृसहस्रेभ्योऽपि हितैषिणा श्रुतिशिरसोपदिष्टमात्मैकत्वदर्शनं कर्तव्यमित्यर्थं इत्यभ्रैतिनः । मुने. मननशीलस्य आत्मा परिशुद्धः सन् परमात्मसदृशो भवतीति विशिष्टाद्वैतिनः ।

Colophon—इति श्रीमद्वशर्षिसंस्तुतिपात्रविश्वामित्रपौत्रजमदग्निसगोत्रमन्त्रकल्पसूत्रपवित्रमद्गुरुतारि (?) नारा...राऊ(चि) पुत्रेण अरुन्धतीसगोत्रमन्त्रकल्पसूत्रपवित्रमहगुरुतारि मानपातिवत्स्या धर्मणितसुगुणनिकुरुम्बधीवुधिवंद्यवास्थागर्भशुक्तिमौक्तिकरमानपातिव्रत्याधगणितसुगुणनिकुरुम्बधीवुधिवंद्रपाम्याशर्भशुक्तिमौक्तिक-

स्नेन श्रीनारायणगजपतिराजन्येन रचितायां कठवल्ल्युपनिषत्प्रतिपद-
व्याख्यायां छिन्नतमःप्रकाशिकाख्यायां द्वितीयाध्याये प्रथमोऽनुवाकः ।

71

11455. कालाग्निरुद्रोपनिषत् ।

Kâlâgnirudropanishad.

This Upanishad treats of the efficacy of besmearing the various parts of the body with sacred ashes, and explains in detail how it is to be done. It appears from the colophon that it is taken from the Nandikeśvarapurâṇa. This differs from the work of the same name, which deals with the same subject and is printed among the अष्टोत्तरशतोपनिषदः, as the former describes in full the Nyâsas, Dhyâna, Vibhûtimantra, Vibhûtidhâraṇamantra, Upamantra and the Rishis, Chhandas, etc. for the ईशानादिपञ्चब्रह्ममन्त्र.

Beginning—ओं श्रीगणेशाय नमः । ओं विष्णुर्विष्णुर्विष्णुराचम्य । वाक् वाक् । प्राण प्राण । घ्राण घ्राण । चक्षुः चक्षुः । श्रोत्र श्रोत्र । नाभि-हृदयं कण्ठे शिरसि । शिखाबाहुभ्यां यशोबलम् । ओं अपवित्रः पवित्रो-वा × × शुचिः । ओं पुण्डरीकाक्षाय नमः । ओं अपसर्पन्तु ये भूता × × × × ते नश्यन्तु शिवाज्ञया ।

ओम् ।

अङ्गुष्ठाग्रे तु गोविन्दं तर्जन्यां च महीधरम् ।
मध्यमायां हृषीकेशं अनामिकायां त्रिविक्रमम् ॥

End—तस्मात्सर्वं विसृज्यैव भस्मस्नानं समाचरेत् ।
जलस्नानाद्विभूतिस्नानं कोटिकोटिगुणाधिकम् ॥

मलस्नानान्मलत्यागी विभूतिस्नानात्सदा शुचिः ।
मन्त्रस्नानं हरेत्पापं ज्ञानस्नानात्परं पदम् ॥

सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ।
तत्फलं समवाप्नोति भस्मस्नानं समाचरेत् ॥

भस्मस्नानात्परं तीर्थं गङ्गास्नानं दिने दिने ।
भस्मरूपी शिवः साक्षाद्भस्म त्रैलोक्यपावनम् ॥

ओं विष्णुः ओं विष्णुः ओं विष्णुः । सोऽहं भस्मस्त्वं रक्ष रक्ष सर्व आत्मा उच्चटन्ति भस्मस्त्वं हुं फट् स्वाहा ।

Colophon—इति श्रीनन्दिकेश्वरपुराणोक्तं(क्ता)-श्रीकालाग्निरुद्रोपनिषत्समाप्ता । शुभं भवतु ।

72

6944 B. केनोपनिषद्विवरणम् ।

Kenopanishadvivaraṇam.

By Upanishadbrahman.

This commentary is in accordance with the ParamÂdvaita system of Vedânta (*Vide*-No. 68 above.)

Beginning—ओं श्रीमन्निखिलाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः।

श्रोत्रादे...श्रोत्रादि रूपं...विदितात्परम् ।
तत्सर्वापह्नवादिसद्धं कलये परमाक्षरम् ॥

तलवकारशाखायां दर्शपूर्णमासादिसमस्तकर्मकर्माङ्गसामानि गायत्रसामर्षिब्राह्मणानि समस्तकर्माश्रयभूतमुख्यप्राणस्यो(पा)सनानि चाभिहितानि × × × ×

प्रत्यगभिन्नब्रह्मजिज्ञासा न जायते । तथाऽपि यज्जिज्ञासोरात्मतत्त्वप्रकाशनाय केनेषितमित्यादि नवमाध्याय आरभ्यते ।

End—भ्रममात्रत्वभावे ब्रह्मणि स्वात्मशेषतया प्रतितिष्ठतीत्यर्थः य एवं निर्बीजं वेद निर्बीज एव स भवतीति स्वमायज्ञानसमकालं स्वमात्राप्राप्तिश्रुतेः आवृत्तिरिति 'शब्दश्च तलवकारशाखागतनवमाध्यायरूपकेनोपनिषत्परिसमाप्त्यर्थः ।

ओम् । श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं केनोपनिषदः स्फुटम् ॥

Colophon—ईशाद्यष्टोत्तरशतोपनिषद्विवरणे द्वितीयसङ्ख्यागोचरकेनोपनिषद्विवरणं सम्पूर्णम् । केनविवरणग्रन्थषट्शतं परिकीर्तितः । ओं श्रीमद्बिम्बाधिष्ठानपरमहंससद्गुरुरामचन्द्रार्पणमस्तु । ओं श्रीरामचन्द्राय परमात्मने नमः । ओम् ॥

73

4836. केवलब्रह्मोपनिषत् ।

Kevalabrahmopanishad.

Here Yājñavalkya narrates to Brahmadatta that the Brahman is the sole cause of all this Universe, and that the forms of the Trinity, Brahmā, Vishṇu and Maheśa originate from the letters अ, उ and म which constitute the mystic syllable ओं emanating as it does from the Brahman.

Beginning—वाजसनेयिशाखायां केवलब्रह्मोपनिषत् ।

वाजसनेयो ब्रह्मदत्तः केवलब्रह्मज्ञानार्थं याज्ञवल्क्यं मुनिमभिससार भो गुरो मां केवलं ब्रह्म ब्रूहीति । स होवाच याज्ञवल्क्यः केवलमानन्दमयं सच्चिदात्मकमनिर्वचनीयं तेजोमयमद्वैतं मनोवचोऽगम्यं ब्रह्म आदावासीत् ।

End—अरे ब्रह्मदत्त मया ते निर्गुणसगुणब्रह्मनिर्णयः सम्यक्प्रकारेणाभिहितः । त्वं परमभक्तः पुत्रादप्यधिक इति हेतोस्त्वां प्रति मया ब्रह्मसर्वस्वं दत्तं येन न पुनरावर्तते न पुनरावर्ततइति दिक् । तदा परमगुरु परब्रह्मोपदेष्टारं याज्ञवल्क्यं प्रति शिष्यो ब्रह्मदत्तः प्रोवाच चरणकमले मस्तकं निधाय भगवन् अहं कृतकृत्यो जातः । ब्रह्मीभूतो जातोऽस्मि जीवन्मुक्तोऽस्मि सिद्धोऽस्मि संसारसागरादुद्धृतोऽस्मीति ।

Colophon—इति श्रीवाजसनेयिशाखायां केवलब्रह्मोपनिषत्समाप्तिमगमत् ।

74

3827. कौषीतक्युपनिषद्व्याख्या–ज्ञानमाला ।

Kaushitakyupanishadvyâkhyâ–Jñânamâlâ.

By Nâgara Nârâyaṇa

This is a metrical commentary of the Advaita School on the 11th Adhyâya (or Adhyâyas 13–15 according to the MS described under DC. I. 1. 89) of Kaushitakyâraṇyaka which is otherwise known as Śâṅkhâyanâraṇyaka.

The colophon shewing this to be a commentary on the last Khaṇḍa of the Kaushîtakyupanishad seems to be incorrect, as Śaṅkarânanda has commented on 1–4 Adhyâyas only (Adhyâyas 3-6 of DC. I. 1. 89) of the Âraṇyaka comprising the Upanishad (*Vide* Hps. II. 220).

Beginning—श्रीरामचन्द्रो जयति । ओम् ।

गुरुं नत्वोपदेष्टारं वेदान्तेषु विशारदम् ।
कौषीतकिब्राह्मणान्त्यखण्डव्याख्यां करोम्यहम् ॥ १ ॥

ओमित्येतदुपासीत निर्गुणं प्रकृतेः परम् ।
सच्चिदानन्दरूपं तद्ब्रह्म चिन्मयविग्रहम् ॥ २ ॥

मातृकात्रययाच्याऽस्य शक्तिः स्यात्त्रिगुणात्मिका ।
ईश्वरः स च सूत्रात्मा विराडित्युच्यते बुधैः ॥ ३ ॥

End—सोऽयं गुरुर्गुरुः साक्षाद्ब्रह्म एव न संशयः ।
अन्ते नमो ब्रह्मणे च नमो ब्रह्मण इत्यपि ॥ १०७ ॥

मङ्गलं च समाप्तिश्च द्विरुक्त्या सुप्रदर्शिता ।
नारायणोऽहमद्वैतो नेह नानाऽस्ति किञ्चन ॥ १०८ ॥

निर्गुणघटना ग्रथिता विशुद्धबुद्ध्या विवेकमालेयम् ।
विद्याविवेकरसिकैर्विदेहविशेषैर्धृता नित्यम् ॥ १०९ ॥

Colophon—इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेन्द्रसरस्वती-शिष्याभ्यन्तरनागरनारायणकृतौ कौषीतकिब्राह्मणोपनिषदन्त्य(ख)ण्ड-व्याख्या ज्ञानमाला समाप्ता ।

75

3919. कौषीतक्युपनिषद्व्याख्या-प्रकाशिका

Kaushitakyupanishadvyākhyā-Prakāśikā

By Raṅgarāmānuja

This follows the Viśishṭādvaita system of Vedānta. The commentary for the 2nd Adhyāya is not found in this

MS; and the 3rd and 4th Adhyâyas are marked in the colophons as the 2nd and the 3rd.

Beginning—अथ श्रीरङ्गरामानुजमुनिभाषितां कौषीतक्युपनिषद्व्याख्यां लिखामः ।

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया ।
अञ्जनाचलशृङ्गाभमञ्जलिमेम गाहताम् ॥

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
कौषीतकिश्रुतिव्याख्यां करवाणि यथामति ॥

अर्चिरादिगतितत्प्राप्यदेशविशेषतद्विशिष्टब्रह्मानुभवप्रकारोपदेशायाख्यायिकेयमारभ्यते। नाम्ना चित्रः गाङ्ग्यस्यापत्यं गाङ्ग्यायनिः आरुणिं गौतमं याजनाय प्रार्थितवान् ।

End—आधिपत्यं अधिपतिः परमात्मा 'सर्वस्याधिपति' रिति श्रुतेः । तत्सम्बन्धि आधिपत्यम् । गुणाष्टकं हि ब्रह्मसम्बन्धितया तत्सम्बन्धिरूपं संसारिभ्यः श्रेष्ठतारूपं यस्याराज्यं तदेतीति श्रुतेरर्थं इत्युक्तम्। अन्योऽपि य एतामुपनिषदं...सोऽपीदृशं फलमाप्नोतीत्यर्थः । विरुक्तिरव्यायोपनिषदुभयसमाप्त्यर्थो ।

Colophon—इति श्रीरङ्गरामानुजस्वामिनः कृतौ कौषीतक्युपनिषत्प्रकाशिकायां तृतीयोऽध्यायः ।

76

11751. गोपीचन्दनोपनिषत् ।

Gopichandanopanishad.

This Upanishad describes the merits accruing from,

गुरुं नत्वोपदेष्टारं वेदान्तेषु विशारदम् ।
कौषीतकिब्राह्मणान्त्यखण्डव्याख्यां करोम्यहम् ॥ १ ॥

ओमित्येतदुपासीत निर्गुणं प्रकृतेः परम् ।
सच्चिदानन्दरूपं तद्ब्रह्म चिन्मयविग्रहम् ॥ २ ॥

मातृकात्रयवाच्याऽस्य शक्तिः स्यात्त्रिगुणात्मिका ।
ईश्वरः स च सूत्रात्मा विराडित्युच्यते बुधैः ॥ ३ ॥

End—सोऽयं गुरुर्गुहः साक्षाद्ब्रह्म पव न संशयः ।
अन्ते नमो ब्रह्मणे च नमो ब्रह्मण इत्यपि ॥ १०७ ॥

मङ्गलं च समाप्तिश्च शिष्यत्या सुप्रदर्शिता ।
नारायणोऽहमद्वैतो नेह नानाऽस्ति किंचन ॥ १०८ ॥

निर्गुणरचना ग्रथिता विशुद्धबुद्ध्या विवेकमालेयम् ।
विद्याविवेकरसिकैर्विदेहविशैर्धृता नित्यम् ॥ १०९ ॥

Colophon—इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेन्द्रसरस्वती-शिष्याभ्यन्तरनागरनारायणकृतौ कौषीतकिब्राह्मणोपनिषदन्त्य(ख)ण्ड-व्याख्या ज्ञानमाला समाप्ता ।

75

3919. कौषीतक्युपनिषद्व्याख्या–प्रकाशिका

Kaushitakyupanishadvyākhyā-Prakāśikā.

By Raṅgarāmānuja

This follows the Viśishtādvaita system of Vedānta. The commentary for the 2nd Adhyāya is not found in this

77

6418. छान्दोग्योपनिषदर्थसङ्ग्रहः।

Chhândogyopanishadarthasaṅgrahaḥ.

By Râghavendrayati.

This commentary follows the Dvaita system of Vedanta.

Beginning—अशेषगुणपूर्णाय शोकदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥

श्रीमच्छान्दोग्यातिमहाभाष्यकारादुदीरित(?)।
अ......र्थं सङ्ग्रहस्तेषां क्रियते स्वात्मतुष्टये ॥

इहामुत्र फलभोगविरक्तस्य जरामरणादिमतो मुमुक्षोरधिकारिणोऽनिष्टनिवृत्तीष्टप्राप्तिसाधनप्रतिपादनाय प्रवृत्ताया अस्याः छान्दोग्योपनिषदो हयग्रीवः प्रथम ऋषिः । रमा देवी......तदनन्तरं शक्तिः । हरिर्देवता.... । प्रस्तावप्रतिहारोद्गीथोपद्रवनिधनभेदेन पञ्च भक्तयः अंशा इति यावत् ।

End—तीर्थेभ्यः शास्त्रोक्तेभ्य । अन्यत्र यज्ञादौ हिंसा शास्त्रोक्ता । ततोऽन्यत्र सर्वत्र तान्यहिंसन् स खलु कुटुम्बी यावदायुष्यमेवं वर्तयन् वर्तमान. ब्रह्मलोकमभिसम्पद्यते । न च पुनरावर्तते । तत्रैव निजानन्दमनारतमनुभवन्नास्त इति । पुनरुक्तिरादरार्था । एतच्च कृत्स्नगृहस्थाश्रमधर्मार्पितदेहविषयम् । तदाह सूत्रे-कृत्स्नभावात्तु गृहिणोपि(प)संहार इति ॥ ११८ ॥

Colophon—इति छान्दोग्योपनिषदर्थसङ्ग्रहे सुधीन्द्रपादशिष्यराघवेन्द्रयतिकृतेऽष्टमोऽध्याय. ।

इति छान्दोग्योपनिषद्भाष्यायुक्तार्थसङ्ग्रहः ।
राघवेन्द्रेण यतिना कृतः सज्जनसंविदे ॥

and explains the procedure of, wearing the Ūrdhvapundra mark with Gopichandana on the forehead, etc. The version differs a little from the other extant MSS of the same work.

Beginning—श्रीगणेशाय नम । अथ गोपीचन्दनोपनिषत् लिख्यते। तदो(थो)क्तमथर्ववेदे—

गोपीचन्दनपङ्केन ललाटं यस्तु लेपयेत् ।
एकदण्डी त्रिदण्डी वा स वै मोक्षं समश्नुते ॥ १ ॥

गोपीचन्दनलिप्ताङ्गो यं य पश्यति चक्षुषा ।
त त पूत विजानीयाद्ब्राह्मभिः सत्कृतो भवे(त्) ॥ २ ॥

After the 23rd Śloka—

ओं नमो गोपीजनवल्लभाय । ओं नमो(म)स्तु(स्कृ)स्ये(त्य) भगवन्त नारदः सर्वेश्वर वासुदेव पप्रच्छ-भगवन् ऊर्ध्वपुण्ड्रविधि द्रव्यमन्त्रस्थानः (ना) विसहित मे ब्रूहीति etc. (वासुदेवोपनिषत् begins just in the same way)

End—य एत(तां) ब्राह्मणो गोपीचन्दनोपनिषदमधीते स सर्वपातकेभ्यः पूतो भवति । पापबुद्धिस्तु न जायते । स सर्वेषु तीर्थेषु स्नातो भवति । स सर्वयज्ञयाजी भवति । स सर्वैर्देवैर्ज्ञातो भवति । × × अचला भक्तिश्च वर्धते । सम्यक् ज्ञान लब्ध्वा विष्णुसायुज्यः स(लो)कतामाप्नोति। न च पुनरावर्त्तते न च पुनरावर्त्तते ।

Colophon—इति गोपीचन्दनोपनिषत्सम्पूर्णा समाप्ता ।

77

6418. छान्दोग्योपनिषदर्थसङ्ग्रहः।

Chhândogyopanishadarthasaṅgrahaḥ.

By Râghavendrayati.

This commentary follows the Dvaita system of Vedanta.

Beginning—अशेषगुणपूर्णाय शोकदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥

श्रीमच्छान्दोग्यातिमहाभाष्यकारायुदीरित(?)।
अ......यं सङ्ग्रहस्तेषां क्रियते स्वात्मतुष्टये ॥

इहामुत्र फलभोगविरक्तस्य जरामरणादिमतो मुमुक्षोरधिकारिणोऽनिष्टनिवृत्तीष्टप्राप्तिसाधनप्रतिपादनाय प्रवणाया अस्याः छान्दोग्योपनिषदो हयग्रीवः प्रथम ऋषिः । रमा देवी......तदनन्तरं शक्ति. । हरिर्देवता.... .। प्रस्तावप्रतिहारोद्गीथोपद्रवनिधनभेदेन पञ्च भक्तयः अंशा इति यावत् ।

